नं. ५१०३

वाजसनेयी संहिता
पदपाठ: १ तः २० अध्या
याना:
x x x x

पत्रः १५८ —— सं. १९५२

संहिता ब्राह्मणं

वाजसनेयी संहिता

पदपाठः अध्यायाः १-२०

००७८

॥याज्ञिकसर्व्वात्मात्मजयाज्ञिकदे॥
॥वक्षस्यदंपुस्तकंपदसंहिता॥

॥ श्रीगणेशाय नमः ॥ श्रीयजुर्वेदाय नमः ॥ ॐ ॥ इषे । त्वा । ऊर्जे । त्वा । वायवः । स्थ । देवः । वः । सविता । प्र । अर्प
यतु । श्रेष्ठतमायेति श्रेष्ठ । तमाय । कर्मणे । आ । प्यायध्वं । अघ्न्याः । इंद्राय । भागम् । प्रजावतीरिति प्रजा ।
वतीः । अनमीवाः । अयक्ष्माः । मा । वः । स्तेनः । ईशत । मा । अघशंस इत्यघ शंसः । ध्रुवाः । अस्मिन् । गो
पताविति गो । पतौ । स्यात । बह्वीः । यजमानस्य । पशून् । पाहि ॥ १ ॥ वसोः । पवित्रम् । असि । द्यौः । पृ
थिवी । मातरिश्वनः । घर्मः । विश्वधा इति विश्व । धाः । परमेण । धाम्ना । दृंहस्व । मा । ह्वाः । मा । ते । यज्ञप ति

शिवसत्
१

रि ति यज्ञ। पतिः। कार्षीत्॥ २॥ शतधारमिति शत। धारं। सहस्रधारमिति सहस्र। धारम्। देवः। त्वा। स
विता। पुनातु। वसोः। पवित्रेण। शतधारेणेति शत। धारेण। सुप्वेति सु। प्वा। काम्। अधुक्षः॥ ३॥ सा। वि
श्वायुरिति विश्व। आयुः। विश्वकर्मेति विश्व। कर्म्मा। विश्वधाया इति विश्व। धायाः। इन्द्रस्य। त्वा। भा
गम्। सोमेन। आ। तनच्मि। विष्णो इति विष्णो। हव्यम्। रक्ष॥ ४॥ अग्ने। व्रतपत इति व्रत। पात। व्रतम्। च
रिष्यामि। तत्। शकेयम्। तत्। मे। राध्यताम्। इदम्। अहम्। अनृतात्। सत्यम्। उप। एमि॥ ५॥ कः। त्वा।

धूर्वीयस्मान्वयम्।धूर्वामिः।देवानाम्।असि।वह्नितममिति
वह्नि।तमम्।३

शुनक्षि।सगं।कस्मै।तस्मै।कर्म्मणे।वाम्।वेषाय।वाम्॥६॥प्रत्युष्टमिति प्रति।उष्टम्।रक्षः।प्रत्युष्टाइति
प्रति।उष्टाः।अरातयः।निष्टप्तम्।निस्तप्तमितिनिः।तप्तम्।रक्षः।निष्टप्ताः।निस्तप्ताइतिनिः।तप्ताः।अरातयः।
उरु।अन्तरिक्षम्।अनु।एमि॥७॥धूः।असि।धूर्व।धूर्वन्तम्।धूर्व।तम्।यः।अस्मान्।धूर्वति।तम्।सस्नितममिति
सस्नि।तमम्।पप्रितममिति पप्रि।तमम्।जुष्टतममिति जुष्ट।तमम्।देवहूतममिति देव।हूतमम्॥८॥अ
ह्रुतम्।असि।हविर्द्धानमिति हविः।धानम्।विष्णुः।त्वा।क्रमताम्।उरु।वाताय।अपहतमित्यप।हतम्।रक्षः।य

धूर्वीयं वयं धूर्वामिः
देवानामसि वह्नितमं

छृताम्। पंचा॥ ॐ॥ देवस्य। त्वा। सवितुः। प्रसव इति प्र। सवे। अश्विनोः। बाहुभ्यामिति बाहुभ्याम्। पूष्णः।
हस्ताभ्याम्। अग्नये। जुष्टम्। गृह्णामि। अग्नीषोमाभ्याम्। जुष्टम्। गृह्णामि॥१०॥ भूताय। त्वा। न। अरातये। स्वः।
ख्वा २ अभिवि[illegible]षमित्यभि। वि। ख्येषम्। दृंहन्ताम्। दुर्याः। पृथिव्याम्। उरु। अंतरिक्षम्। अनु। एमि। पृथिव्याः।
त्वा। नाभौ। सादयामि। अदित्याः। उपस्थ इत्युप। स्थे। अग्ने। हव्यम्। रक्ष॥११॥ पवित्रे इति पवित्रे। स्थः। वैष्ण
व्यौ। सवितुः। वः। प्रसव इति प्र। सवे। उत्। पुनामि। अच्छिद्रेण। पवित्रेण। सूर्यस्य। रश्मिभिरिति रश्मिभिः। देवीः। दे
वीः। आपः। अग्रेगुव इत्यग्रे। यज्ञपतिमिति यज्ञ। देवयुव[illegible]मिति देवयुवम्। युष्माः। इंद्रः। अवृणीत। वृ

गुवः। अग्रेपुव इत्यग्रे। पुवः। अग्रे। इमम्। अद्य। यज्ञम्। नयत। अग्रे। यज्ञपतिमिति यज्ञ। पतिम्। सुधातुमिति सु। धातुम्। १
पतिम्॥

१ यूयम्। इन्द्रम्। अवृणीध्वम्। वृत्रतूर्य इति वृत्र। तूर्ये।

अ। तूर्य इति वृत्र। तूर्ये। प्रोक्षिताः इति प्र। उक्षिताः। स्थ। अग्नये। त्वा। जुष्टम्। प्र। उक्षामि। अग्नीषोमाभ्या

म्। दैव्याय। कर्मणे। शुन्धध्वम्। देवयज्याया इति देव। यज्यायै। यत्। वः। अशुद्धाः। पराजघ्नुरिति परा। जघ्नुः। अ२

3 इदम्। वः। तत्। शुन्धामि। ॥१३॥ शर्म। असि। अवधूतमित्यव। धूतम्। रक्षः। अवधूता इत्यव। धूताः। अरातयः। अदि

त्याः। त्वक्। असि। प्रति। त्वा। अदितिः। वेत्तु। अद्रिः। असि। वानस्पत्यः। ग्रावा। असि। पृथुबुध्न इति पृथु।

बुध्नः। प्रति। त्वा। अदित्याः। त्वक्। वेत्तु। ॥१४॥ अग्नेः। तनूः। असि। वाचः। विसर्जनमिति वि। सर्जनम्। देववी 3

तय इति देव। वीतये। त्वा। गृह्णामि। बृहद्ग्रावेति बृहत्। ग्रावा। असि। वानस्पत्यः। सः। इदम्। देवेभ्यः

असि। प्रति। त्वा। वृषवृद्धमिति वृष
वृद्धं

ह विः। शमीष्व। शमिष्वेति शमिष्व। सुशमीति सु। शमि। शमीष्व। शमिष्वेति शमिष्व। हविष्कृत्। हविःकृ
दिति हविः। कृत्। आ। इहि। इहि। रुपा। ऊकुटः। असि। मधुजिह्व इति मधु। जिह्वः। इषम्। ऊर्जम्। आ। वद। त्वया। व
यम्। संघातं संघातमिति संघातम्। संघातम्। जेष्म। वर्षवृद्धमिति वर्ष। वृद्धं। नि। त्वा। परापूतमिति परा। पू
तम्। रक्षः। परापूता इति परा। पूताः। अरातयः। अपहतमित्यप। हतम्। रक्षः। वायुः। वः। वि। विनक्तु। देवः।
वः। सविता। हिरण्यपाणिरिति हिरण्य। पाणिः। प्रति। गृभ्णातु। अच्छिद्रेण। पाणिना। ॥१८॥ धृष्टिः। असि।
अप। अग्ने। अग्निम्। आमादम्। जहि। निः। क्रव्यादमिति क्रव्य। अदम्। सेध। आ। देवयजम्

तिदेवा।ऊर्जम्।बृहत्।ध्रुवम्।असि।पृथिवीम्।दृंह।ब्रह्मवनीति ब्रह्म।वनि।त्वा।क्षत्रवनीति क्षत्र।वनि
सजातवनीति सजात।वनि।उपदधामि।भ्रातृव्यस्य।वधाय॥१७॥ अग्नेः।ब्रह्म।गृभ्णीष्व।धरुणम्।असि।अन्त
रिक्षम्।दृंह।दिवम्।विश्वाभ्यः।त्वा।आशाभ्यः।उपदधामि।चितः।स्थ।ऊर्ध्वचित इत्यूर्ध्व।चितः।भृगू
णाम्।अङ्गिरसाम्।तपसा।तप्यध्वम्॥१८॥ धिषणा।असि।पर्वती।प्रति।त्वा।आदित्याः।त्वक्।वेत्तु।दि
वः।स्कम्भनीः।असि।धिषणा।असि।पार्वतेयी।प्रति।त्वा।पर्वती।वेत्तु॥१९॥ धान्यम्।असि।धिनुहि। ४
देवान्।प्राणाय।त्वा।उदानायेत्युत्।आनाय।व्यानायेति वि।आनाय।दीर्घाम्।अनु।प्रसितिमिति प्र।सि

मधुमतीरिति मधुमतीः। मधुमतीभिरिति मधुमतीभिः। एष्यं ता। मृ। २

ति मृ। आयुषे। धर्मा। वर्द्धुषे। चा। महीनाम्। पयः। असि। २०। समा। वृपामि। आपः। अषधीभिः। अषधय।
रसेन। रेवतीः। जगतीभिः। एष्यंतां। २१। जनयाद्ये। चा। सम्। आमिः। इदं। अ। मे। इदम्। अग्नीषोमयोः।
इषे। चा। धर्मः। असि। विश्वायुः। इति विश्व। आयुः। उरु प्रथाः। इति उरु। प्रथाः। उरु। प्रथस्व। उरु। ते। यज्ञपति
रिति यज्ञ। पतिः। प्रथताम्। अग्निः। ते। त्वचम्। मा। हिंसीत्। देवः। चा। सविता। श्रपयतु। वर्षिष्ठे। अधि। नाके। अ२
॥२२॥ मा। भेः। मा। सम्। विक्थाः। अतमेरुः। यजमानस्य। प्रजेति प्र। जा। भूयात्। त्रिताय। चा। द्विताय। एकताय। २३। आ। ददे। अध्वरकृतमिति अध्वर। कृतम्। देवेभ्यः। इंद्रस्य। बाहुः। असि। दक्षिणः। सहस्रभृष्टिः

यज्ञः। अतमेरुः।

मृ। १

तिसद्दस्वा नृष्णि: । शलतेजा इतिम्रात । तेजा: । वायु: । असि । तिग्मतेजा इति तिग्म । तेजा: । द्विषत: ।
5 वध: ॥२४॥ पृथिवि । देवयजनीति देव । यजनि । ओषधया: । ते । मूलम् । मा । हिंसिषम् । व्रजम् । गच्छ । गोष्ठा
नम् । गोस्ठानमिति गो । स्ठानम् । वर्षतु । ते । द्यौ: । बधान । देव । सवितरिति सवित: । परमस्याम् । पृथि
व्याम् । शतेन । पाशै: । य: । अस्मान् । द्वेष्टि । यम् । च । वयम् । द्विष्म: । तम् । अत: । मा । मौक् ॥२५॥ अप । अरुरु
म् । पृथिव्या । देवयजनादिति देव । यजनात् । बध्यासम् । अररो इत्यररो । दिवम् । मा । पप्तः । द्रप्स: । ते । द्या ५
म् । मा । स्कन् ॥२६॥ गायत्रेण । त्वा । छंदसा । परि । गृह्णामि । त्रैष्टुभेन । त्रैस्तुभेनेति त्रैस्तुभेन । जागतेन । त्वा ।

द्मा। व। असि। शिवा। वा। असि। स्योना। सुषदा। सुसदेतिसु।सदा। ऊर्ज्जस्वती। पयस्वती॥२७॥ पुरा।
क्रूरस्य। विसृपइतिविसृपः। विरप्शिन्नितिविरप्शिन्। उदादायेत्युत्।आदाय। पृथिवीम्। जीवदानुमि
तिजीव।दानुम्। याम्। ऐरयन्। चंद्रमसि। स्वधाभिरितिस्वधा।भिः। ताम्। ऊँ इत्यूँ। धीरासः। अनुदिश्येत्यनु।दिश्य। यजंते।
प्रोक्षणीरितिप्र।उक्षणीः। आ। सादय। द्विषतः। वधः। असि॥२८॥ अनिशितइत्यनि।शितः। असि। सपत्नक्षि
दितिसपत्न।क्षित्। वाजिनम्। त्वा। वाजेध्यायाइतिवाज।इध्यायै। सम्। मार्ज्मि। अनिशितेत्यनि।शिता। असि। सपत्नक्षिदि
पत्न।क्षित्। वाजिनीम्। त्वा। वाजेध्यायाइतिवाज।इध्यायै। सम्। मार्ज्मि॥ ॥२९॥ अदित्यै। रास्ना। असि। वि

स्तोः। विष्णवे। असि। ऊर्जे। त्वा। अदब्धेन। त्वा। चक्षुषा। अव। पश्यामि। अग्नेः। जिह्वा। असि। सुहूरिति सुऽहूः।
देवेभ्यः। धाम्ने धाम्न इति धाम्ने। धाम्ने। मे। भव। यजुषे यजुष इति यजुषे। यजुषे। [illegible]॥ सवितुः। त्वा। ते-
6 जः। असि। शुक्रम्। अमृतम्। धाम। नाम। प्रियम्। देवानाम्। अनाधृष्टम्। देवयजनमिति देवऽयजनम्। अ-
सि॥३१॥ ॥इति संहितापदपाठे प्रथमोध्यायः॥ ॥कृष्णः। असि। आखरेष्ठः। आखरेस्थ इत्या-
खरेऽस्थः। अग्नये। त्वा। जुष्टम्। प्र। उक्षामि। वेदिः। असि। बर्हिषे। त्वा। जुष्टाम्। प्र। उक्षामि। बर्हिः। अ-
सि। स्रुग्भ्य इति स्रुक्ऽभ्यः। त्वा। जुष्टम्। प्र। उक्षामि॥१॥ अदित्यै। व्युंदनमिति विऽउंदनम्। असि। विष्णोः। स्तुपः।
मू १

असि। ऊ सर्मं अग्र्र दस मिच्छू सर्मे। अग्र दसमु। चा। स्वणामि। स्वासस्वामितिस्व। श्रासस्वाम्। देवेभ्य न भुवपतयइति
भुवे। पतये स्वाहा। भुवन पतयइति भुवन। पतये। भूतानाम्। पतये। २। गंधर्वः। चा। विश्वा वसुः। वि
श्व वसुरिति विश्वा। वसुः। परिदधातु। विश्वस्य। अरिष्टे। यजमानस्य। परिधिरिति परि। धिः। असि। अ
ग्निः। इडः। ईडितः। इंद्रस्य। बाहुः। असि। दक्षिणः। मित्रावरुणौ। चा। उत्तरतः। परि। धत्ताम्। ध्रुवेण। ध
र्मणा। ३। वीतिहोत्रमितिवीति। होत्रे। चा। कवे। क्रमंतमि ति। मंतम्। सं। इधीमहि। अग्ने। बृहंतम्। अध्वरे। न।
म
घु। १

सुर

समिद्धि त्ति सम् । इन्नू । त्र्प्रसि । स्यूर्यश्चा । पुरस्तात् । पान्तु । कस्या । । चित् । त्र्प्रनिश्चास्त्या । इ थ्य निन्ना । स्त्यो । सविङ्क ।
बाहू । इति बाहू । स्वः । ऊर्ध्वं प्रद । मिव्यू । र्त्ती । प्रदसंचा । स्तृणामि । स्वा । सस्त्व मित्ति स्वा । त्र्प्रा । सस्त्वम् । देवेत्यः । त्र्प्रा । चा ।
वसवः । रुद्रा । त्र्प्रादित्याः । सदं । प । घृताची । त्र्प्रसि । जुहूः । नाम्ना । सा । इदं म । प्रियेण । धाम्ना । प्रियम् । सदः
त्र्प्रा । सीद । उपभृदित्य । पा । नृता । ध्रुवा । ध्रुवा । त्र्प्रसदन् । ऋतस्य । यो । नौ । ना । विष्णो इति विष्णो । पाहि । पाहि । य
ज्ञम् । पाहि । यज्ञपत्ति मित्ति यज्ञ । पतिम् । पाहि । माम् । यज्ञन्यमित्ति यज्ञ । न्यम् । । त्र्प्रमै । वाजजिदित्ति वाज । ७

मुर मृ॥

जितं। वाजम्। आसरिष्यन्तम्। वाजजितमिति वाजऽजितं। समम्। मार्ज्मि। नमः। देवेभ्यः। स्वधा। पितृभ्यः

इति पितृऽभ्यः। यमः। सुयमम्। इति सुऽयमम्। भूयास्म। १॥ अस्कन्नम्। अद्य। देवेभ्यः। आज्यम्। सम्। भ्रियासम्। म्रिर

अंघ्रिणा। विष्णो। इति विष्णो। मा। त्वा। अवक्रमिषम्। वसुमतीमिति वसुऽमतीम्। अग्ने। ते। छायाम्। उपस्थे

षम्। विष्णोः। स्थानम्। असि। इतः। इन्द्रः। वीर्यम्। अकृणोत्। ऊर्ध्वः। अध्वरः। आ। अस्थात्। २॥ अग्नेः। वेः। हो

त्रम्। वेः। दूत्यम्। अवताम्। त्वाम्। द्यावापृथिवी। इति द्यावापृथिवी। स्विष्टकृदिति स्विष्टऽकृत्। देवेभ्यः

इन्द्रः। आज्येन। हविषा। भूत्। स्वाहा। सं। ज्योतिषा। ज्योतिः। ३॥ मयि। इदम्। इन्द्रः। इन्द्रियम्। दधातु। अ

२ अव। तां। द्यावापृथिवी इति द्यावापृथिवी।

स्मां नाराय॑ मघवानमिति मघवानः। सवंताम्। अस्माकम्। संतु। आशिषड्या। शिवःसत्याः। नः। संतु।
आशिषड्या। शिषः। सत्याः। नः। संतु। आशिषड्या। शिषः। उपहूतेयं पाङ्क्ता। पृथिवी माता। उप मां माम्।
8 पृथिवी माता। ह्वयताम्। अग्निः। आग्नीध्रमनु। स्वाहा।।१०।। उपहूतोऽयं पाङ्क्तः। द्यौः। पिता। उप मां माम्। द्यौः।
पिता। ह्वयताम्। अग्निः। आग्नीध्रात्। स्वाहा।। प्रति। गृह्णामि। अग्नेः। वा। आस्येनां। प्राश्नामि।।११।। एतं
तां। देव। सवितः। यज्ञम्। प्राहुः। बृहस्पतये। ब्रह्मणे। तेन। यज्ञम्। अव। तेन। यज्ञपतिमिति यज्ञ। ८।।
पतिम्। तेन। मामव।।१२।। मनः। ज्योतिः। जुषताम्। आज्यस्य। बृहस्पतिः। यज्ञमिमम्। तनोतु। अरिष्टम्।

यज्ञम्। सम्। इमम्। दधातु। विश्वे। देवासः। इह। मादयंताम्। ॐ। प्रतिष्ठ॥ १३॥ एषा। ते। अग्ने। समिदि
ति सम्। इत्। तया। वर्द्धस्व। च। आ। च। प्यायस्व। वर्द्धिषीमहि। च। वयम्। आ। च। प्यासिषीमहि। ससृवांऽ
समिति ससृ। वांऽसम्। वाज जितमिति वाज। जितम्॥ १४॥ अग्नीषोमयोः। उज्जितिमित्युत्। जितम्। अनु।
उत्। जेषम्। वाजस्य। मा। प्रसवेनेति प्र। सवेन। प्र। ऊहामि। अग्नीषोमौ। तम्। अप। नुदताम्। वाजस्य। एन
म्। प्रसवेनेति प्र। सवेन। अप। ऊहामि। इंद्राग्न्योः। इंद्राग्नी इतींद्राग्नी॥ १५॥ वसुभ्य इति वसु। भ्यः। त्वा। रुद्रे
भ्यः। आदित्येभ्यः। सम्। जानाथाम्। द्यावापृथिवी इति द्यावापृथिवी। मित्रावरुणौ। त्वा। वृष्ट्या। अवताम्।

वां तु । वयः । अक्रमुः । रिरिहाणाः । मरुताम् । पृषतीः । गच्छ । वशा । पृश्निः । भूत्वा । दिवम् । गच्छ । ततः । नः । वृ
ष्टिम् । आ । वह । चक्षुष्पाः । चक्षुःपा इति चक्षुः । पाः । अग्ने । असि । चक्षुः । मे । पाहि ॥ १५ ॥ यम् । परिधिमिति
परि । धिम् । पर्यधत्था इति परि । अधत्थाः । अग्ने । देव । पणिभिरिति पणि । भिः । गुह्यमानः । तम् । ते । एतम् । अ
१ नु । जोषम् । भरामि । एषः । न । इत् । त्वत् । अपचेतयाता इत्यप । चेतयातै । अग्नेः । प्रियम् । पाथः । अपि । इतम् ॥ ६
॥ १६ ॥ संस्रवभागा इति संस्रव । भागाः । स्थ । इषा । बृहन्तः । प्रस्तरेष्ठाः । प्रस्तरेस्था इति प्रस्तरे । स्थाः ।
परिधेया इति परि । धेयाः । च । देवाः । इमाम् । वाचम् । अभि । विश्वे । गृणन्तः । आसद्य । असद्य । अस्मिन् । बर्हि

पि । मा । दयध्वम् । स्वाहा । वाट् ॥ १७ ॥ घृताचीस्थइति घृताची । स्थः । धुर्यौ । पातम् । सुम्नेइतिसुम्ने । स्थः । सुम्ने । मा । धत्तम् ।
यज्ञ । नमः । च । ते । उप । च । यज्ञस्य । शिवे । सं । तिष्ठस्व । स्विष्टइतिसुइष्टे । मे । सम् । तिष्ठस्व ॥ १८ ॥ अग्ने । अदब्धायो इ
त्यदब्ध । आयो । अशीतम । अशीतमेत्यशीतम । पाहि । मा । दिद्योः । प्रसित्याइतिप्र । सित्यै । दुरिष्ट्याइतिदुः । इष्ट्यै ।
दुरद्मन्याइतिदुः । अद्मन्यै । अविषम् । नः । पितुम् । कृणु । सुषदा । सुसदेतिसु । सदा । योनौ । स्वाहा । वाट् । संवे
शपतयइतिसंवेश । पतये । स्वाहा । सरस्वत्यै । यशो । भगिन्याइतियशः । भगिन्यै । स्वाहा ॥ १९ ॥ वेदः । असि । ये
न । त्वम् । देव । वेद । देवेभ्यः । वेदः । अभवः । तेन । मह्यम् । वेदः । भूयाः । देवाः । गातुविदइतिगातु । विदः । गातुम् ।

विद्या। गातुम्। इत। मनसः। पते। इमम्। देव। यज्ञम्। स्वाहा। वाते। धाः॥ २०॥ सम्। बर्हिः। अङ्क्ताम्। हविषा। घृ
तेन। सम्। आदित्यैः। वसुभिरितिवसु।भिः। मरुद्भिरितिमरुत्।भिः। इन्द्रः। विश्वदेवेभिरितिविश्व।देवेभिः। अ
क्ताम्। दिव्यम्। नभः। गच्छतु। यत्। स्वाहा॥ २१॥ कः। त्वा। वि। मुंचति। सः। कस्मै। तस्मै। पोषाय। रक्षसाम्। भा
10 गः। असि॥ २२॥ सम्। वर्चसा। पयसा। सम्। तनूभिः। अगन्महि। मनसा। सम्। शिवेन। त्वष्टा। सुदत्र इति सु।
दत्रः। वि। दधातु। रायः। अनु। मार्ष्टु। तन्वः। यत्। विलिष्टमितिवि। लिष्टम्॥ २३॥ दिवि। विष्णुः। वि। अक्रं १०
स्त। जागतेन। छंदसा। ततः। निर्भक्त इति निः।भक्तः। अंतरिक्षे। त्रैष्टुभेन। त्रैस्तुभेनेतित्रैस्तुभेन। पृथि

चया। अग्ना। अ इ। गृहप। तिनां। तिगृह। पतिना। भ्यासं। गृहपति ... गृहपते

व्याम्। गायत्रेण। अस्मात्। अन्नात्। अस्यै। प्रतिष्ठायाः। प्रतिष्ठायाइतिप्रति। स्थायाः। अगन्म। स्वरि
तिस्वः। सम्। ज्योतिषा। अभूम। ॥२०॥ स्वयंभूरितिस्वयम्। भूः। असि। श्रेष्ठः। रश्मिः। वर्चोदाइतिवर्चः। दाः। अ
सि। वर्चः। मे। देहि। सूर्यस्य। आवृतमिति। आवृतम्। अनु। आ। वर्ते। ॥२१॥ अग्ने। गृहपतइतिगृह। पते। सुगृहप
तिरितिसु। गृहपतिः। त्वम्। मया। अग्ने। गृहपतिना। नतिगृह। पतिना। भूयाः। अस्थूरि। नौ। गार्हपत्यानीतिगा
र्हपत्यानि। संतु। शतम्। हिमाः। अग्ने। वारिषम्। तत्। अशाकम्। तत्। मे। अराधि। इदम्। अहम्। यः। एव। अस्मि
सः। अस्मि। ॥२२॥ अग्नये। कव्यवाहनायेतिकव्य। वाहनाय। स्वाहा। सोमाय। पितृमतइतिपितृ। मते। स्वाहा। अ

पहता इत्यप। हताः। असुराः। रक्षांसि। वेदिषदः। वेदिसद इति वेदि। सदः॥२७॥ ये। रूपाणि। प्रतिमुंचमाना
इतिप्रति। मुंचमानाः। असुराः। संतः। स्वधया। चरंति। पराऽपुर इति परा। पुरः। निऽपुर इति नि। पुरः। ये। भरंति। अ
ग्निः। तान्। लोकात्। प्र। नुदाति। अस्मात्॥२८॥ अत्र। पितरः। मादयध्वम्। यथाभागमिति यथा। भागम्। आ। वृ
षायध्वम्। वृषयध्वमिति वृषायध्वम्। अमीमदंत। पितरः। यथाभागमिति यथा। भागम्। आ। वृषायिषत॥२९॥
नमः। वः। पितरः। रसाय। शोषाय। जीवाय। स्वधायै। घोराय। मन्यवे। नमः। वः। पितरः। पितरः। नमः। वः। गृहान्। नः। पि ११
तरः। दत्त। सतः। वः। पितरः। देष्म। एतत्। वः। पितरः। वासः॥३०॥ आ। धत्त। पितरः। गर्भम्। कुमारम्। पुष्करस्रज। मिति

३

पुष्करा।स्त्रजम्।यथा।इदा।पुरुस्थः।अस्मत्।ऊर्ज्जम्।वहंतीं।अमृतम्।घृतम्।पयनःकीलालम्।परिस्रुतमि
तिपरिसरि।स्रुतम्।स्वधाः।स्थ।तर्प्पयत।मा।पितॄन्॥३२॥ ॥इतिसंहितापदपाठेद्वितीयोध्यायः॥ ॥
समिधेतिसम्।इधा।अग्निम्।दुवस्यत।घृतैः।बोधयत।अतिथिम्।आ।अस्मिन्।हव्या।जुहोतन॥१॥सु
समिद्धायेतिसु।सम्।इद्धाय।शोचिषे।घृतम्।तीव्रम्।जुहोतन।अग्नये।जातवेदसइतिजात।वेदसे॥२॥त
म्।त्वा।समिद्भिरितिसमित्।भिः।अंगिरः।घृतेन।वर्द्धयामसि।बृहत्।शोच।यविष्ठ्य॥३॥उप।त्वा।अग्ने।हविष्म
तीः।घृताचीः।यंतु।हर्य्यत।जुषस्व।समिधइतिसम्।इधः।मम॥४॥भूः।भुवः।स्वः।द्यौरिवेतिद्यौः।इव।भूम्ना।पृ

॥३॥

थिवीवेति पृथिवि। इव। वरिम्णा। तस्याः। ते। पृथिवि। देवयजनीतिदेव। यजनि। पृष्ठे। अग्निम्। अन्नाद
मित्यन्न। अदम्। अन्नाद्यायेत्यन्न। अद्याय। आ। दधे। ५। आ। अयम्। गौः। पृश्निः। अक्रमीत्। असदत्। मा
प्रयन्निति तरम्। पुरः। पितरम्। च। प्रयन्निति प्रयन्। स्वरिति स्वः। ६। अन्तः। चरति। रोचना। अस्य। प्राणात्। अपानती
त्यप। अनती। वि। अख्यत्। महिषः। दिवम्। ७। त्रिंशत्। धाम। वि। राजति। वाक्। पतङ्गाय। धीयते। प्रति
वस्तोः। अह। द्युभिरिति द्यु। भिः। ८। अग्निः। ज्योतिः। ज्योतिः। अग्निः। स्वाहा। सूर्यः। ज्योतिः। ज्योतिः। सूर्यः। १२
स्वाहा। अग्निः। वर्चः। ज्योतिः। ज्योतिः। वर्चः। स्वाहा। सूर्यः। वर्चः। ज्योतिः। वर्चः। स्वाहा। ज्योतिः। सूर्यः। सूर्यः। ९।

ज्योतिः। स्वाहा॥९॥ सजूरिति स। जूः। देवेन। सवित्रा। सजूरिति स। जूः। रात्र्या। इंद्रवत्येतीद्र। वत्या। जुषाणः।
अग्निः। वेतु। स्वाहा। उषसः। सूर्यः॥१०॥ उपप्रयंत इत्युप। प्रयंतः। अध्वरम्। मंत्रम्। वोचेम। अग्नये। आरे। अस्मे
इत्यस्मे। च। शृण्वते॥११॥ अग्निः। मूर्द्धा। दिवः। ककुत्। पतिः। पृथिव्याः। अयम्। अपाम्। रेतांसि। जिन्वति। उभा। वा
म्। इंद्राग्नी इतींद्राग्नी। आहुवध्यमइत्या। हुवाध्यै। उभा। राधसः। सह। मादयध्यै। उभा। दाता। रौ। इषाम्। रयीणाम्।
उभा। वाजस्य। सातये। हुवे। वाम्॥१२॥ अयम्। ते। योनिः। ऋत्वियः। यतः। जातः। अरोचथाः। तम्। जानन्। अग्ने। आ
रोह। अथ। नः। वर्द्धय। रयिम्॥१३॥ अयम्। इह। प्रथमः। धायि। धातृभिरिति धातृ। भिः। होता। यजिष्ठः। अध्वरे। ष्वीड्यः।

यमूत्र प्रवानः। नृगवः। विरुरुत्तुरितिवि। रुरुत्तुः। वनेषु। चित्रम्। विभ्वमितिवि। भ्वम्। विशेविशइतिविशे।
विशे॥२५॥ अस्य। प्रत्नाम्। अनु। द्युतम्। शुक्रम्। दुदुह्रे। अह्रयः। पयः। सहस्रमितिसहस्र। साम्। ऋषिम्॥२६॥
तनूपाइतितनू। पाः। अग्ने। असि। तन्वम्। मे। पाहि। आयुर्दाइत्यायुः। दाः। अग्ने। असि। आयुः। मे। देहि। वर्चोदा
इतिवर्चः। दाः। अग्ने। असि। वर्चः। मम। आ। देहि। अग्ने। यत्। मे। तन्वाः। ऊनम्। तत्। मे। आ। पृण॥२७॥ इंधानाः। त्वा।
13 शतम्। हिमाः। द्युमंतमितिद्यु। मंतम्। सम्। इधीमहि। वयस्वंतः। वयस्कृतम्। वयः। कृतमितिवयः। कृतम्। स २३
हस्वंतः। सहस्कृतम्। सहः। कृतमितिसहः। कृतम्। अग्ने। सपत्नदंभनमितिसपत्न। दंभनम्। अदब्धा

सः। अदाभ्यम्। विश्वावसो। विश्ववसो इति विश्व। वसो। स्वस्ति। ते। पारम्। अशीय॥ १८॥ सम्। चम्। अग्नेः। सूर्यस्य।
वर्चसा। अगथाः। ऋषीणाम्। स्तुतेन। प्रियेण। धाम्ना। अहम्। आयुषा। वर्चसा। प्रजयेति प्र। जया। रायः। पोषेण।
ग्मिषीय॥ १९॥ अंधः। स्थ। अंधः। वः। भक्षीय। महः। स्थ। महः। वः। भक्षीय। ऊर्जः। स्थ। ऊर्जम्। वः। भक्षीय। रायः।
पोषः। स्थ। रायः। पोषम्। वः। भक्षीय॥ २०॥ रेवतीः। रमध्वम्। अस्मिन्। योनौ। गोष्ठे। गोस्थ इति गो। स्थे। लोके। क्षये। इह।
एव। स्त। मा। अप। गात॥ २१॥ संहितेति सम्। हिता। असि। विश्वरूपीति विश्व। रूपी। ऊर्जा। मा। आ। विश। गौप
त्येन। उप। त्वा। अग्ने। दिवेदिवे इति दिवा। दिवे। दोषावस्तरिति दोषा। वस्तः। धिया। वयम्। नमः। भरंतः। आ। इमसि।

।२२।।राजन्तम्।अध्वराणाम्।गोपाम्।ऋतस्य।दीदिविम्।वर्द्धमानम्।स्वे।दमे।।२३।।सः।नः।पितेवेति पिता।इ
वा।सूनवे।अग्ने।सूपायन इति सु।उपायनः।भव।सचस्व।नः।स्वस्तये।।२४।।अग्ने।त्वम्।नः।अन्तमः।उत।त्राता।
शिवः।भव।वरूथ्यः।वसुः।अग्निः।वसुश्रवा इति वसु।श्रवाः।अच्छ।नक्षि।द्युमत्तममिति द्युमत्।तमम्।रयिम्।
14 दाः।।२५।।तम्।त्वा।शोचिष्ठ।दीदिव इति दीदिवः।सुम्नाय।नूनम्।ईमहे।सखिभ्य इति सखि।भ्यः।सः।नः।
बोधि।श्रुधि।हवम्।उरुष्य।नः।अघायत इत्यघ।यतः।समस्मात्।।२६।।इडे।आ।इहि।अदिते।आ।इ २४
हि।काम्याः।आ।इत।मयि।वः।कामधरणमिति काम।धरणम्।भूयात्।।२७।।सोमानम्।स्वरणम्।कृणुहि।ब्र

ब्रह्मणः। पते। कक्षीवंतम्। यः। औशिजः॥२८॥ यः। रेवान्। यः। अमीवहा। अमीवहेत्यमीवहा। वसुविदिति वसु। वित्। पुष्टि
वर्द्धन इति पुष्टि। वर्द्धनम्। सः। नः। सिषक्तु। सिषक्त्विति सिषक्तु। यः। तुरः॥२९॥ मा। नः। शंसः। अररुषः। धू
र्तिः। प्रणक्। मर्त्यस्य। रक्ष। नः। ब्रह्मणः। पते॥३०॥ महि। त्रीणाम्। अवः। अस्तु। द्युक्षम्। मित्रस्य। अर्यम्णः। दुरा
धर्षमिति दुः। आ। धर्षम्। वरुणस्य॥३१॥ नहि। तेषाम्। अमा। चन। न। अध्वसु। वारणेषु। ईशे। रि
पुः। अघशंस इत्यघ। शंसः॥३२॥ ते। हि। पुत्रासः। अदितेः। प्र। जीवसे। मर्त्याय। ज्योतिः। यच्छंति। अजस्रम्॥३३॥
कदा। चन। स्तरीः। असि। न। इंद्र। सश्चसि। दाशुषे। उपोपेत्युप। उप। इत्। नु। मघवन्निति मघवन्। भूयः। इत्। नु।

या

नु। ते। दानम्। देवस्य। भूच्यते॥३४॥ तत्। सवितुः। वरेण्यम्। भर्गः। देवस्य। धीमहि। धियः। यः। नः। प्रचोदयादि

15 ति प्र। चोदयात्॥३५॥ परि। ते। दूडभः। दुःऽदभः इति दुःऽदभः। रथः। अस्मान्। अश्नोतु। विश्वतः। येन। रक्षसि। दाशु

षः॥३६॥ स्वः इति स्वः। सुप्रजाः इति सुऽप्रजाः। प्रजाः। प्रजाभिरिति प्रऽजाभिः। स्याम्। सुवीराः इति सुऽवीराः। वीरैः। सु

पोषः इति सुऽपोषः। पोषैः। नर्य। प्रजाम् इति प्रऽजाम्। मे। पाहि। शंस्य। पशून्। अथर्य। पितुम्॥३७॥ आग

न्म। विश्ववेदसम् इति विश्वऽवेदसम्। अस्मभ्यम्। वसुवित्तमम् इति वसुवित्ऽतमम्। अग्ने। सम्राट् इति सम्ऽराट्। अभि ५ २५

द्युम्नम्। अभि। सहः। आ। यच्छस्व॥३८॥ अयम्। अग्निः। गृहपतिः इति गृहऽपतिः। गार्हपत्यः इति गार्हऽपत्यः। प पः।

प्र जायाऽइतिप्रऽजायाः। वसुवित्तमऽइतिवसुऽवित्तमः। अग्ने। गृहपतऽइतिगृहऽपते। पुरीष्यः। रयिमानितिरयिऽमान्। पुष्टि
वर्द्धनऽइतिपुष्टिऽवर्द्धनः। अग्ने। पुरीष्य॥ ३९॥ गृहाः। मा। बिभीत। मा। वेपध्वम्। ऊर्जम्। बिभ्रतः। आ। इमसि। ऊर्जम्। बिभ्रत्। वः।
सुमनाऽइतिसुऽमनाः। सुमेधाऽइतिसुऽमेधाः। गृहान्। आ। एमि। मनसा। मोदमानः॥ ४०॥ येषाम्। अध्येतीत्यधिऽएति। प्र
वसन्नितिप्रऽवसन्। येषु। सौमनसः। बहुः। गृहान्। गृहान्। यामहे। तान्। नः। जानन्तु। जानतः॥ ४१॥ उपहूताऽइत्युपऽहूताः।
अपोकृत्या मह इह। गावः। उपहूताऽइत्युपऽहूताः। अजावयः। अथोऽइत्यथो। अन्नस्य। कीलालः। उपहूतऽइत्युपऽहूतः। गृहेषु। नः। क्षे
माय। वः। शान्त्यै। प्र। पद्ये। शिवम्। शग्मम्। शंयोरितिशम्ऽयोः। शंयोः॥ ४२॥ प्रघासिनऽइतिप्रऽघासिनः। हवामहे। मरुतः। च। रि

शंयोरितिशंऽयोः

शादसः। करंभेण। सजोषस इति सजोषसः॥४३॥ यत्। ग्रामे। अरण्ये। सभायाम्। इंद्रिये। एनः। चकृम। वयम्। इदम्। तत्।
16 अव। यजामहे। स्वाहा॥४४॥ मो इति मो। सु। नः। इंद्र। अत्र। पृत्स्विति पृत्सु। देवैः। अस्ति। हि। स्म। ते। शुष्मिन्। अवयाः इत्यव
याः। महः। चित्। यस्य। मीढुषः। यव्या। हविष्मतः। मरुतः। वंदते। गीः॥४५॥ अक्रन्। कर्म। कर्मकृत इति कर्म कृतः। सह। वा
चा। मयोभुवेति मयः भुवा। देवेभ्यः। कर्म। कृत्वा। अस्तम्। प्र। इत। सचाभुव इति सचा भुवः॥४६॥ अवभृथेत्यवभृथ। निचुं
पुणेति नि चुंपुण। निचेरुरिति नि चेरुः। असि। निचुंपुण इति नि चुंपुणः। अव। देवैः। देवकृतमिति देव कृतम्। एनः। १६
अयासिषम्। अव। मर्त्यैः। मर्त्यकृतमिति मर्त्य कृतम्। पुरुराव्ण इति पुरु राव्णः। देव। रिषः। पाहि॥४७॥ पूर्णा। दर्वि। परा। पत।

सुशुसेतिसुऽशुसी । घृनेः । अपत । वस्त्रे । वैतिवस्त्रा । इव । वि । श्रीणामदे । इषम् । ऊर्ज्जम् । सूद्धात । क्रत्तोइतिशतऽक्रतो ।। ४८ ।।

ददिमेददामिति । नि । मे । धेहि । नि । ते । दधे । निहारमितिनिऽहारम् । च । हरासि । मे । निहारमितिनिऽहारम् । निहाराणि । ते । ऋ° १

स्वाहा ।। ४९ ।। अक्षन् । अमीमदन्त । हि । अव । प्रियाः । अधूषत । अस्तोषत । स्वभानवइतिस्वऽभानवः । विप्राः । नविष्ठया । मती ।

ऋ ३ योजेनु । इंद्र । ते । हरीइतिहरी ।। ५० ।। सुसंदृशमितिसुऽसंदृशम् । त्वा । वयम् । मघवन्नितिमघऽवन् । वंदिषीमहि । प्र । नूनम् । पू

र्णवंधुरइतिपूर्णऽवंधुरः । स्तुतः । याक्षि । वशान् । अनु ।। ५१ ।। मनः । नु । आ । ह्वामहे । नाराशंसेन । स्तोमेन । पितॄणाम् । च

मन्मभिरितिमन्मऽभिः ।। ५२ ।। आ । नः । एतु । मनः । पुनरितिपुनः । क्रत्वे । दक्षाय । जीवसे । ज्योक् । च । सूर्य्यम् । दृशे ।। ५३ ।। पुनः ।

17

नः। पितरः। मनः। ददातु। दैव्यः। जनः। जीवम्। व्रातं। सचेमहि॥५५॥ वयम्। सोम। व्रते। तव। मनः। तनूषु। बिभ्रतः।
प्रजावंत इति प्रजाऽवंतः। सचेमहि॥५६॥ एषः। ते। रुद्र। भागः। सह। स्वस्रा। अंबिकया। तं। जुषस्व। स्वाहा। आखुः।
ते। पशुः॥५७॥ अव। रुद्रम्। अदीमहि। अव। देवम्। त्र्यंबकम् इति त्रि। अंबकम्। यथा। नः। वस्यसः। करत्। श्रेयसः।
व्यवसाययादिति वि। अवसाययात्॥५८॥ भेषजम्। असि। भेषजम्। गवे। अश्वाय। पुरुषाय। भेषजम्। सुखमिति
सुऽखम्। मेषाय। मेष्यै॥५९॥ त्र्यंबकमिति त्रि। अंबकम्। यजामहे। सुगंधिमिति सु। गंधिम्। पुष्टिवर्द्धनमिति पुष्टि।
वर्द्धनम्। उर्वारुकमिवेत्युर्वारुकम्। इव। बंधनात्। मृत्योः। मुक्षीय। मा। अमृतात्। पतिवेदनमिति पतिवेदनम्। इतः। १७॥

जमदग्नेरिति जमत् अग्नेः । कश्यपस्य । त्र्यायुषमिति त्रिआयुषं

मुक्षीय । मा । अमृतात् ॥ ६० ॥ एतत् । ते । रुद्र । अवसम् । तेन । परः । मूजवतइति मूजऽवतः । अति । इहि । अवततधन्वेत्य
वततऽधन्वा । पिनाकावसइति पिनाकऽवसः । कृत्तिवासाइति कृत्तिऽवासाः । अहिंसन् । नः । शिवः । अति ।
इहि ॥ ६१ ॥ त्र्यायुषमिति त्रि । आयुषम् । यत् । देवेषु । त्र्यायुषमिति त्रि । आयुषम् । तत् । नः । अस्तु । त्र्यायुष
मिति त्रि । आयुषम् ॥ ६२ ॥ शिवः । नाम । असि । स्वधितिरिति स्वऽधितिः । ते । पिता । नमः । ते । अस्तु । मा । मा । हिंसीः ।
निवर्त्तयामि । आयुषे । अन्नाद्यायेत्यन्नऽअद्याय । प्रजननायेति प्रऽजननाय । रायः । पोषाय । सुप्रजास्त्वाय

18 तिस्रु। प्रजाः। व्याय। सुवीर्यायेति स्रु। वीर्याय॥ ॥इति संहितापदपाठे तृतीयोध्यायः॥ ॥आ। इदम्।
अगन्म। देवयजनमिति देव। यजनम्। पृथिव्याः। यत्र। देवासः। अजुषंत। विश्वे। ऋक्सामाभ्यामिति ऋक्। साम।
भ्याम्। संतरंत इति सम्। इषा। मदेम। इमाः। आपः। शम्। उँ इत्यूँ। मे। संतु। देवीः। ओषधे। त्रायस्व। स्वधिते इति स्व।
धिते। मा। एनम्। हिंसीः॥ १॥ आपः। अस्मान्। मातरः। शुंधयंतु। घृतेन। नः। घृतप्व इति घृत। प्वः। पुनंतु। विश्वम्। १८
हि। रिप्रम्। प्रवहंतीति प्र। वहंती। देवीः। उत्। इत्। आभ्यः। शुचिः। आ। पूतः। एमि। दीक्षातपसोः। तनूः। असि। ताम्। त्वा।

१८८

शिवाम्। राग्माम्। परि। दधे। नइम्। वर्णीमं। गुभ्णा॥२॥ वृत्रस्य। असि। कनीनकः। चक्षुर्द्दइति चक्षुः। दाः। अ
सि। चक्षुः। मे। देहि॥३॥ चित्पतिरिति चित्। पतिः। मा। पुनातु। वाक्पतिरिति वाक्। पतिः। देवः। सविता। तस्य। ते।
पवित्रपतइति पवित्र। पते। पवित्रपूतस्येति पवित्र। पूतस्य। यत्कामइति यत्। कामः। पुने। तत्। शकेयम्॥४॥
आ। वः। देवासः। आशिषइया। शिषः। यज्ञियासः। हवामहे॥५॥ स्वाहा। यज्ञम्। मनसः। उरोः। अंतरिक्षात्।
द्यावापृथिवीभ्याम्। वातात्। आ। रभे। स्वाहा॥६॥ आकूत्याइत्याकूत्यै। प्रयुजइति प्र। युजे। अग्नये। स्वाहा। मे
धायै। मनसे। दीक्षायै। तपसे। सरस्वत्यै। पूष्णे। अग्नये। स्वाहा। आपः। देवीः। बृहतीः। विश्वशंभुवइति वि।

स्य।शंतु वः।द्यावापृथिवी इति द्यावापृथिवी।उरो इत्युरो।अंतरिक्षात्।बृहस्पतये।हविषा।विधेम।स्वा
19 हा।।७।।विश्वः।देवस्य।नेतुः।मर्तः।वुरीत।सख्यम्।विश्वः।राये।इषुध्यति।द्युम्नम्।वृणीत।पुष्यसे।
स्वाहा।।८।।ऋक्सामयोरित्यृक्।सामयोः।शिल्पे इति शिल्पे।स्थः।ते इति ते।वाम्।आ।रभे।ते इति ते।
मा।पातम्।आ।अस्य।यज्ञस्य।उदृच इत्युत्ऽऋचः।शर्म।असि।शर्म।मे।यच्छ।।९।।ऊर्क्।असि।आंगिरसी।
ऊर्णम्रदा इत्यूर्णऽम्रदाः।ऊर्जम्।मयि।धेहि।सोमस्य।नीविः।असि।विष्णोः।शर्म।असि।शर्म।यजमान १९
स्य।इंद्रस्य।योनिः।असि।सुसस्या इति सुऽसस्याः।कृषीः।कृधि।उत्।श्रयस्व।वनस्पते।ऊर्ध्वः।मा।पा

द्रि। अछंदसः ॥१०॥ व्रतम्। अनुऽव्रता। व्रतम्। अनुऽव्रता। अग्निः। ब्रह्मा। अग्निः। यज्ञः। वनस्पतिः। यज्ञि
येन। देवीम्। धियम्। मनामहे। सुमृडीकामिति सुऽमृडीकाम्। अभिष्टये। वर्चोधामिति वर्चःऽधाम्। यज्ञवाह
समिति यज्ञऽवाहसम्। सुतीर्थेति सुऽतीर्था। नः। असत्। वशा। ये। देवासः। मनोजाता इति मनःऽजाताः। मनोयु
जा इति मनःऽयुजः। दक्षक्रतव इति दक्षऽक्रतवः। ते। नः। अवंतु। ते। नः। पांतु। तेभ्यः। स्वाहा॥११॥ ग्रावाणः। पीताः। म
वता। स्वयम्। आपः। अस्माकम्। अंततः। उदरे। सुशेवा इति सुऽशेवाः। ताः। अस्मभ्यम्। अयक्ष्माः। अनमीवाः। अनाग
सः। स्वदंतु। देवीः। अमृताः। ऋतावृध इति ऋतऽवृधः॥१२॥ इयम्। ता। यज्ञिया। तनूः। अपः। मुंचामि। न।

१० प्रजा।मिति प्रजाम्।अष्ट।दोमुत्वइयं।ह।सुवः।स्वादो।रुत्ताइति स्वादो।रुत्ता।पृथिवीम्।आ।विराता।वृधि
१३ व्या।समान्नबू।अग्ने।त्वम्।स्तो।ज्ञा।गृहि।वयम्।स्तुा।मं दिषीम्।हि।रद्धः।नः।अप्रयुच्छन्नियच्रा।युच्छन्।व्रवुधइति
व्रा।वुधो।नः।पुनरितिपुनः।ऊधि।१४।पुनः।मनः।पुनः।आयुः।मा।आ।अगन्।पुनरितिपुनः।प्राणः।पुनः।आ
त्मा।मो।आ।अगन्।पुनरितिपुनः।चक्षुः।पुनरितिपुनः।श्रोत्रम्।मे।आ।अगन्।पुनरितिपुनः।चक्षुः।पुनरि
तिपुनः।श्रोत्रम्।मा।आ।अगन्।वैश्वानरः।अदब्धः।तनूपाइतितनू।पाः।अग्निः।नः।पातु।दुरितात्।इतिदुः।इता २०
त्।अवद्यात्।१५।त्वम्।अग्ने।व्रतपाइतिव्रत।पाः।असि।देवः।आ।मर्त्येषु।आ।त्वम्।यज्ञेषु।ईड्यः।रास्व।इयत्।

सोम। आ। त्वयः। तरा। देवः। नः। सविता। वसोः। दाता। वसु। अदात्॥२६॥ एषा। ते। शुक्र। तनूः। एतत्। वर्चः। तया।
सम्। भव। भ्राजम्। गच्छ। ऊर्जः। असि। धुता। मनसा। जुष्टा। विष्णवे॥२७॥ तस्याः। ते। सत्यसवसइति सत्य। सवसः।
प्रसवइतिप्र। सवे। तन्वः। यंत्रम्। अशीय। स्वाहा। शुक्रम्। असि। चंद्रम्। अमृतम्। विश्वदेवमिति विश्व। देवम्॥२८॥
चित्। मना। धीः। दक्षिणा। क्षत्रिया। यज्ञिया। अदितिः। उभयतः। शीर्ष्णी। उभयतः। शीर्ष्णी। सा। नः। सुप्राचीतिसु
प्राची। सुप्रतीचीतिसुप्रतीची। एधि। मित्रः। त्वा। पदि। बध्नीताम्। पूषा। अध्वनः। पातु। इंद्राय। अध्यक्षायेत्यधि। अ
क्षाय॥२९॥ अनु। त्वा। माता। मन्यताम्। पिता। भ्राता। सगर्भ्यइतिस। गर्भ्यः। सखा। सयूथ्यइतिस। यूथ्यः।

अनु।

सा। देवि। देवम्। अछ। इहि। इंद्राय। सोमम्। रुद्रः। वा। आ। वर्त्तयतु। स्वस्ति। सोमसखेति सोमऽसखा। पु
नः। आ। इहि॥२०॥ वस्वी। असि। अदितिः। आदित्या। रुद्रा। चंद्रा। बृहस्पतिः। वा। सुम्ना। रम्नस्व। रुद्रः। वसु
भिरिति वसुऽभिः। आ। चके॥२१॥ अदित्याः। वा। मूर्द्धन्। आ। जिघर्मि। देवयजन इति देवऽयजने। पृथिव्याः।
21 इडायाः। पदम्। असि। घृतवदिति घृतऽवत्। स्वाहा। अस्मे इत्यस्मे। रमस्व। अस्मे इत्यस्मे। ते। बंधुः। त्वे इति त्वे। रायः।
मे इति मे। रायः। मा। वयम्। रायः। पोषेण। वि। यौष्म। तोतः। रायः॥२२॥ सम्। अख्ये। देव्या। धिया। सम्। दक्षिणया। २१
उरुचक्षसेत्युरुऽचक्षसा। मा। मे। आयुः। प्र। मोषीः। मो इति मो। अहम्। तव। वीरम्। विदेय। तव। देवि। संदृशीति सम्।

द्वि॥र२॥एषः।ते।गायत्रः।भागः।इति।मे।सोमाय।ब्रूतात्।त्रैष्टुभः।त्रैस्तुभइतित्रैस्तुभः।जागतः।
छंदोनामानामितिछंदः।नामानाम्।साम्राज्यमितिसाम्।राज्यम्।गच्छ।आस्माकः।असि।शुक्रः।ते।ग्रह्यः।
विचितइतिवि।चितः।त्वा।वि।चिन्वंतु॥२४॥अभि।त्यम्।देवम्।सवितारम्।ओण्योः।कविक्रतुमितिकवि।क्रतु
म्।अर्चामि।सत्यसवसमितिसत्य।सवसम्।रत्नधामितिरत्न।धाम्।अभि।प्रियम्।मतिम्।कविम्।ऊर्ध्वा।यस्या
अमतिः।भाः।अदिद्युतत्।सवीमनि।हिरण्यपाणिरितिहिरण्य।पाणिः।अमिमीत।सुक्रतुरितिसु।क्रतुः।
कृपा।स्वरितिस्वः।प्रजाभ्यइतिप्रजाभ्यः।त्वा।प्रजाइतिप्र।जाः।त्वा।अनुप्राणंत्वित्यनु।प्राणंतु।प्रजाइतिप्र।जाः।

त्वमू । अनुप्रा । णिदीयन्ते । प्राणिहि ॥ २५ ॥ शुक्रम् । त्वा । शुक्रेण । क्रीणामि । चंद्रम् । चंद्रेण । अमृतम् । अमृ
तेमू । न । सग्मे । ते । गोः । अस्मे इयस्मे । ते । चंद्राणि । तपसः । तनूः । असि । प्रजापतेरिति प्रजा । पतेः । वर्णः ।
22 परमेण । पशुना । क्रीयसे । सहस्रपोषमिति सहस्र । पोषम् । पुषेयम् ॥ २६ ॥ मित्रः । नः । आ । इहि । सुमित्र
धइति सु । मित्रधः । इंद्रस्य । ऊरुम् । आ ॥ विश । दक्षिणम् । उशन् । उशंतम् । स्योनः । स्योनम् । स्वान । भ्राज । अंघा
रे । बंभारे । हस्त । सुहस्तेति सु । हस्त । कृशानो इति । एते । वः । सोमक्रयणा इति सोम । क्रयणाः । २२
तान् । रक्षध्वम् । मा । वः । दभन् ॥ २७ ॥ परि । मा । अग्ने । दुश्चरितादिति दुः । चरितात् । बाधस्व । आ । मा । सुचरिते

इतिसु।ऽईरिता।जनः।उत।आसुषा।स्वासुषेतिसु।आसुषा।उत।अस्थात्।अमृतान्।अनु॥२८॥प्रति।पंथा
म्।अपऽद्विषम्।स्वस्तिऽगाम्।इतिस्वस्ति।गाम्।अनेहसम्।येन।विश्वाः।परि।द्विषः।वृणक्ति।विंदते।वसु॥
॥२९॥अदित्याः।वरुण।असि।अदित्यैः।सदः।आ।सीद।अस्तभ्नात्।द्याम्।वृषभः।अंतरिक्षम्।अमिमीत।व
३ पि रिमाणम्।पृथिव्याः।आ।असीदत्।विश्वा।भुवनानि।संम्राडितिसम्।राट्।विश्वा।इत्।तानि।वरुणस्य।व्रतानि।
॥३०॥वनेषु।वि।अंतरिक्षम्।ततान।वाजम्।अर्वत्स्वित्यर्वत्।सु।पयः।उस्रियासु।हृत्स्वितिहृत्।सु।क्रतुम्।
वरुणः।विक्षु।अग्निम्।दिवि।सूर्यम्।अदधात्।सोमम्।अद्रौ॥३१॥सूर्यस्य।चक्षुः।आ।रोह।अग्नेः।अ

स्ताः। कनीनकम्। यत्र। एतग्मेतिः। ईयसे। भ्राजमानः। विपश्चितेतत्ति विपः। चिता॥ ३२॥ उस्रौ। आ। इतम्। धूर्षाहौ।
धूः।सहाविति धूः।सहौ। युञ्जेथाम्। अनश्रू इत्यनश्रू। अवीरहणौ। अवीरहनाविति अवीर।हनौ। ब्रह्मचोदना
23 विति ब्रह्म।चोदनौ। स्वस्ति। यजमानस्य। गृहान्। गच्छतम्॥ ३३॥ भद्रः। मे। असि। प्र। च्यवस्व। भुवः। पते। वि
श्वानि। अभि। धामानि। मा। त्वा। परिपरिण इति परि। परिणः। विदन्। परिपंथिन इति परि। पंथिनः। वृकाः।
अघायवः। अघयव इत्यघ।यवः। श्येनः। भूत्वा। परा। पत। यजमानस्य। गृहान्। गच्छ। तत्। नौ। संस्कृतम्॥ ३४॥ २३
नमः। मित्रस्य। वरुणस्य। चक्षसे। महः। देवाय। तत्। ऋतम्। सपर्यत। दूरेदृश इति दूरे। दृशे। देवजाताय इति दे

वा। जातोय। केतवे। दिवः। पुत्राय। सूर्याय। शंसत॥ ३५॥ वरुणस्य। उत्तंभनम्। असि। स्कंभसर्जनीयइ
ति स्कंभ। स्कंभसर्जनी। स्थः। ऋतसदनी इत्यृत। सदनी। ऋतसदनमित्यृत। सदनम्। आ। सीद॥ ३६॥ या। ते। धा
मानि। हविषा। यजंति। ता। ते। विश्वा। परिभूरिति परि। भूः। अस्तु। यज्ञम्। गयस्फान इति गय। स्फानः। प्र
तरण इति प्र। तरणः। सुवीर इति सु। वीरः। अवीरहेत्यवीर। हा। प्र। चर। सोम। दुर्यान्॥ ३७॥ ॥ इति पद
पाठे चतुर्थोऽध्यायः॥ ॥ अग्नेः। तनूः। असि। विष्णवे। त्वा। सोमस्य। अतिथेः। आतिथ्यम्। श्येनाय।
सोमभृत इति सोम। भृते। अग्नये। रायस्पोषद इति रायस्पोष। दा॥ १॥ अग्नेः। जनित्रम्। असि। वृष

तो। स्थः। उर्वशी। आयुः। पुरूरवाः। पेथा। मि॥२॥ नवतं। नः। समनसा वितिस। मनसौ। सचेतसा
वितिस। चेतसौ। अरेपसौ। मा। यज्ञम्। हिंसिष्टम्। मा। यज्ञपतिमितियज्ञ। पतिम्। जातवेदसावि
तिजात। वेदसौ। शिवौ। भवतम्। अद्य। नः॥३॥ अग्नौ। अग्निः। चरति। प्रविष्टइतिप्र। विष्टः। ऋषी
णाम्। पुत्रः। अभिशस्तिपावेत्यभिशस्ति। पावा। सः। नः। स्योनः। सुयजेतिसु। यज। यज्ञ। इह। देवे
भ्यः। हव्यम्। सदम्। अप्रयुच्छन्नित्यप्र। युच्छन्। स्वाहा॥४॥ आपतयइत्या। पतये। त्वा। परिपतय 24
इतिपरि। पतये। गृह्णामि। तनूनप्त्रइतितनू। नप्त्रे। शाक्वराय। शक्वने। ओजिष्ठाय। अनाधृष्टम्। असि। अ

शास्त्रा। आग्नशाखिनाऽइत्याग्निशास्त्रा। पाः। अग्नानिशास्त्राग्ने त्सानाजि।

नाधृष्यम्। दिवा नाम। ऽजे अजनाजिशाखीयनजिः। ग्रास्तेन्यम्। अंजसा। सत्यम्। उपगेषम्। स्वितइतिसु।
इत्ता। मा। क्षत्रः॥५॥ अग्ने। व्रतपाइतिव्रतपाः। त्वेइतित्वे। व्रतपाइतिव्रतपाः। या। तव। तनूः। इयम्। सा। मयि। योइतियो। मम। तनूः। एषा। सा। त्वयि। सह। नौ। व्रतपतइतिव्रतपते। व्रतानि। अनु। मे। दीक्षाम्। दीक्षापतिरितिदीक्षापतिः। मन्यताम्। अनु। तपः। तपस्पतिः। तप। इति। तपः। पतिः। मन्यताम्। अनु। तपः। तपस्पतिस्तपः पतिरितितपःपतिः॥६॥ अंशुः अंशुः। ते। देव। सोम।
आप्यायताम्। इंद्राय। एकधनविद इत्येकधनविदे। आ। तुभ्यम्। इंद्रः। प्यायताम्। आ। त्वम्। इंद्राय। प्यायस्व। आ।

५१

प्याऽस्व। प्यायय। अस्मान्। सऽखीन्। संऽन्या। मेधया। स्वस्ति। ते। देव। सोम। सुत्याम्। अशीयाऽइत्याऽइ
याऽइ श्रोरायैः। आऽहा। नगौया। नतम्। ऋतम्। तवा दिन्यऽइष्यृत। वा दिन्यः। नमः। द्यावापृथिवीभ्याम्॥७॥
या। ते। अग्ने। अयः। शा। अयच्छयः। शाया। तनूः। वर्षिष्ठा। गह्वरेष्ठा। गह्वरेस्थेति गह्वरऽस्था। उग्रम्। वचः।
अपाऽअवधीत्। त्वेषम्। वचः। अपाऽअवधीत्। स्वाहा। रजःऽशाये ति रजः। शया। हरिऽशायेति हरि। शाया।
॥८॥ तत्ऽशायनीति तत्ऽशा। अयनी। मे। असि। वित्ताऽयनीति वित्ता। अयनी। मे। असि। अवतात्। मा। नाथितात्।
अवतात्। मा। व्यथितात्। विदेत्। अग्निः। नभः। नाम। अग्ने। अंगिरः। यः। आयुना। नाम्ना। आ। इहि। यः। अस्या।

२५

२५

असि

मा। पृथिव्याम्। असि। यत्। ते। अनाधृष्टम्। नाम। यज्ञियं। तन्नं। या। आदधे। द्वितीयस्याम्। तृतीयस्याम्।
अनु। त्वा। देववीतये इति देव। वीतये। ८। सिं० हि। सपत्नसाही। सपत्नही इति सपत्न। सही। देवेभ्यः। कल्पस्व।
शुंधस्व। शुंभस्व। १०। इंद्रघोषः इतीद्र। घोषः। त्वा। वसुभिरिति वसु। भिः। पुरस्तात्। पातु। प्रचेता इति प्र।
चेताः। रुद्रैः। पश्चात्। मनोजवा इति मनः। जवाः। पितृभिरिति पितृ। भिः। दक्षिणतः। विश्वकर्मेति विश्व। क-
र्मा। आदित्यैः। उत्तरतः। इदम्। अहम्। तप्तम्। वाः। बहिर्द्धेति बहिः। धा। यज्ञात्। निः। सृजामि। ११। सिं
० हि। असि। स्वाहा। आदित्यवनिरित्यादित्य। वनिः। ब्रह्मवनिरिति ब्रह्म। वनिः। क्षत्रवनिरिति क्षत्र। वनिः।

सुप्रजा।वनिरितिसुप्रजा।वनिः।रायस्पोषवनिरितिरायस्पोष।वनिः।ब्रा।वृद्धा।देवान्।यजमानाय।स्वा
हा।स्मृत्त्या।घा।।१२।।ध्रुवः।असि।इमाम्।पृथिवीम्।दृंह।ध्रुवक्षिदितिध्रुव।क्षित्।अंतरिक्षम्।अच्युत
2b त्क्षिदित्यच्युत।क्षित्।दिवम्।अग्नेः।पुरीषम्।असि।।१३।।युंजते।मनः।उत।युंजते।धियः।विप्राः।
विप्रस्य।बृहतः।विपश्चितः।इतिविपः।चितः।विऽहोत्राः।दधे।वयुनावित्।वयुनविदितिवयुन।वित्।
एकः।इत्।मही।देवस्य।सवितुः।परिष्टुतिः।परिस्तुतिरितिपरि।स्तुतिः।स्वाहा।।१४।।इदम्।विष्णुः।वि २६
चक्रमे।त्रेधा।नि।दधे।पदम्।सम्।ऊढम्।इतिसम्।ऊढम्।अस्य।पांसुरे।स्वाहा।।१५।।इरावती।इतीरा।वती।

धेनुमतीइति धेनुामती। हिन्नुतम। सुयवसिनी। सुयवसिनीइति सु।यवसिनी। मनवे। दूरास्या। विाऋस्कन्ता:। रोदसीइति रोदसी। विऋोइति विऋो। एतेइयोत। दाधर्त्थ। पृथिवीम्। अभितः। मयूर्षा। रवे:। स्वाहा। २६।
।देवश्रुत्तौ। वितिदेव। श्रुत्तौ। देवेषु। आ। घोषतम्। प्राचीइति प्राचीं। प्र। इतम्। अध्वरम्। कल्पयन्तीइति कल्पयन्ती। ऊर्ध्वम्। यज्ञम्। नयतम्। मा। जिह्वरतम्। स्वम्। गोष्ठम्। गोस्थमिति गो।स्थम्। आ। वदतम्। देवीइति देवी। दुर्येइति दुर्ये। आयुः। मा। निः। वादिष्टम्। प्रजाम्। मा। निः। वादिष्टम्। अत्र। रमेथम्। वर्ष्मन्। पृथिव्याः। १७। विष्णोः। नु। कम्। वीर्याणि। प्र। वोचम्। यः। पार्थिवानि। विममइति वि।ममे। रजांसि।

यः। अस्कभायत। उत्तरमित्युत्ऽतरम्। सधस्थमिति सधऽस्थम्। विचक्रमाण इति वि। चक्रमाणः। त्रेधा। उरुगाय

इत्युरु। गायः। विष्णवे। त्वा। १८। दिवः। वा। विष्णो इति विष्णो। उत। वा। पृथिव्याः। महः। वा। विष्णो इति विष्णो। उरोः। अं-

तरिक्षात्। उभा। हि। हस्ता। वसुना। पृणस्व। आ। प्र। यच्छ। दक्षिणात्। आ। उत। सव्यात्। विष्णवे। त्वा। १९। प्र। तत्। विष्णुः।

स्तवते। वीर्येण। मृगः। न। भीमः। कुचरः। गिरिष्ठाः। गिरिस्था इति गिरिऽस्थाः। यस्य। उरुषु। त्रिषु। विक्रमणेष्विति

विऽक्रमणेषु। अधिक्षियंति। भुवनानि। विश्वा। २०। विष्णोः। रराटम्। असि। श्नप्त्रे। स्थः। स्यूः। ध्रुवः।

वैष्णवम्। विष्णवे। त्वा। नाशी। असि। इदम्। अहम्। तम्। वलगम्। उत्। किरामि। यम्। मे। निष्ट्यः। यम्। अमात्यः। निचखा।

नेति नि। चरवान। समानः। असमानः। सबंधुरिति स। बंधुः। असबंधुरित्यसा बंधुः। सजात इति स। जातः। असजातः।
उत्। हन्यामि। किरामि। स्वराडिति स्व। राट्। असि। सपत्नहेति सपत्न। हा। सत्रराडिति सत्र। राट्। अभिमातिहेत्यभिमाति। हा। जनरा
डिति जन। राट्। रक्षोहेति रक्षः। हा। सर्वराडिति सर्व। राट्। अमित्रहेत्यमित्र। हा॥२४॥ रक्षोहणः। रक्षोहन इति रक्षः।
हनः। वः। वलगहनः। इति वलग। हनः। प्र। उक्षामि। वैष्णवान्। अवनयामि। अव। स्तृणामि। रक्षोहणौ। रक्षोहनावि
ति रक्षः। हनौ। वाम्। वलगहनाविति वलग। हनौ। उप। दधामि। वैष्णवीइति। वैष्णवी। परि। ऊहामि। वैष्णवीइति वि
ष्णवी। वैष्णवम्। असि। वैष्णवाः। स्थ॥२५॥ यवः। असि। यवय। अस्मत्। द्वेषः। यवय। अरातीः। दिवे। त्वा।
अंतरिक्षाय। पृथिव्यै। शुंधंताम्। लोकाः। पितृषदनाः। पितृसदना इति पितृ। सदनाः। पितृषदनम्। पितृसदनमि

सकलमादि
हा २

तिपिष्टा। सदनम्। असि॥२६॥ उत। दिवम्। स्तभान। आ। अंतरिक्षम्। पृण। दृंहस्व। पृथिव्याम्। द्युतानः। त्वा। मारु
तः। मिनोतु। मित्रावरुणौ। ध्रुवेण। धर्मणा। ब्रह्मवनीति ब्रह्म। वनि। त्वा। क्षत्रवनीति क्षत्र। वनि। रायस्पोषवनीति
रायस्पोष। वनि। परि। ऊहामि। ब्रह्म। दृंह। क्षत्रम्। आयुः। प्रजामिति प्र। जाम्॥२७॥ ध्रुवा। असि। ध्रुवः। अयम्। य
जमानः। आयतन इत्या। यतने। प्रजयेति प्र। जया। पशुभिरिति पशु। भिः। भूयात्। घृतेन। द्यावापृथिवी इति द्यावा
पृथिवी। पूर्येथाम्। इंद्रस्य। छदिः। असि। विश्वजनस्येति विश्व। जनस्य। छाया॥२८॥ परि। त्वा। गिर्वणः। गिरः।
इमाः। भवंतु। विश्वतः। वृद्धायुमिति वृद्ध। आयुम्। अनु। वृद्धयः। जुष्टाः। भवंतु। जुष्टयः॥२९॥ इंद्रस्य। स्यूः। असि। २८॥
ध्रुवः। ऐंद्रम्। विश्वदेवमिति विश्व। देवम्॥३०॥ विभूरिति वि। भूः। असि। प्रवाहण इति प्र। वाहनः। वह्निः।

स्वधावा स्वेन इति स्वधा। वार्दनः। श्वात्रः। अन्वे ताइ ति श्वा। वेत्ताः। उथ्यः। विश्ववेदा इति विश्व। वेदाः॥ ३०॥ उशिक्। कविः।
त्रयं वारिः। बंनारिः। अवस्यूः। दुवस्वान्। अंधूः। मार्जालीयः। सम्राडिति सम्। राट्। हृष्णानुः। परिषद्यः। परिसद्य इ
ति परि। सद्यः। पवमानः। ननः। प्रतक्वेति प्र। तक्वा। मेहः। दृष्टास्वदन इति दृष्टा। स्वदनः। शतधम मेव्यत। धमा। स्वर्ज्यो
तिरिति स्वः। ज्योतिः॥ ३१॥ समुद्रः। विश्ववाचा इति विश्व। वाचाः। अक्षजः। एक। पादिये क। पात्। अदितिः। बुध्नः। वाक्। ऐंद्र। मुस
दः। ऋतस्य। द्वारो। मा। मा। सम। ता। नम्। अध्वनाम्। अह्नपत इत्यह्न। पते। प्रमा। तिर। स्वस्ति। मे। अस्मिन्। पथि। देवया
न इति देव। यानाः। नृयात्॥ ३२॥ मित्रस्य। मा। चक्षुषा। ईदध्वम्। अग्नयः। सगराः। सगराः। स्थ। सगारेण। नाम्नारौ

ऽइणा। अनीकेन। पात। मा। अग्नयः। पिपृत। गोपायत। नमः। वः। अस्तु। मा। मा। हिंसिष्ट॥ ३३॥ ज्योतिः। असि।
विश्वरूपमिति विश्वऽरूपम्। विश्वेषाम्। देवानाम्। समिदिति सम्ऽइत्। त्वम्। सोम। तनूकृद्भ्य इति तनूकृत्ऽभ्यः।
२१ द्वेषोभ्य इति द्वेषःऽभ्यः। अन्यकृतेभ्य इत्यन्यऽकृतेभ्यः। उरु। यन्ता। असि। वरूथम्। स्वाहा। जुषाणः। अप्तुः। आ
ज्यस्य। वेतु। स्वाहा॥ ३४॥ अग्ने। नय। सुपथेति सुऽपथा। राये। अस्मान्। विश्वानि। देव। वयुनानि। विद्वान्। युयो
धि। अस्मत्। जुहुराणम्। एनः। भूयिष्ठाम्। ते। नमउक्तिमिति नमःऽउक्तिम्। विधेम॥ ३५॥ अयम्। नः। अग्निः। वरि २१
वः। कृणोतु। अयम्। मृधः। पुरः। एतु। प्रभिन्दन्निति प्रऽभिन्दन्। अयम्। वाजान्। जयतु। वाजसाताविति वाजऽसातौ।

तो । र दुस्व। मा। त्वा। दान र ए त त्वा। ली देव। सोम। [illegible] देवो [illegible]

अयम्। वाम्। जयत्। उ। उदर्द्दं पाणः स्वाहा॥ ३८॥ उरु। विष्णो इति विष्णो। वि। क्रमस्व। उरु। क्षयाय। नः। कृधि। घृतम्।
घृतयोन इति घृत। योने। पिब। प्रप्रेति प्र। प्र। यज्ञपतिमिति यज्ञ। पतिम्। तिर। स्वाहा॥ ३९॥ देव। सवितः। एषः। ते। सो
मः। देवः। देवान्। उप। अगाः। इदम्। अदम्। मनुष्यान्। सह। रायः। पोषेण। स्वाहा। निः। वरुणस्य। पाशात्। मुच्येते। अ न
तः। यथायथमिति यथा। यथम्। अमहं॥ ४०॥ अति। अन्याम्। अगाम्। न। अन्याम्। नु। उप। अगाम्। अर्वाक्। त्वा।
परेभ्यः। अविदम्। परः। अवरेभ्यः। तम्। त्वा। जुषामहे। देव। वनस्पते। देवयज्यायाऽइति देव। यज्यायै। देवाः। त्वा।
देवयज्यायाऽइति देव। यज्यायै। जुषन्ताम्। विष्णवे। त्वा॥ ४१॥ द्याम्। मा। लेखीः। अंतरिक्षम्। मा। हिंसीः। पृथिव्या।

समृ। नव। अयम्। हि। त्वा। स्वधितिरिति स्व।धितिः। तेतिजानः। प्रणिनाय। प्रनिनायेति प्र।निनाय। महते। सौभ
गाय। अतः। त्वम्। देव। वनस्पते। शतवल्शा इति शत।वल्शाः। वि। रोह। सहस्रवल्शा इति सहस्र।वल्शाः। वि। वय
30 मू। रुहेम॥ ॥इति पदपाठे पञ्चमोऽध्यायः॥ ॥ अग्रेणीः। अग्रेनीरित्यग्रे।नीः। असि। स्वावेश इति सु।आ।वे
शः। उन्नेतॄणामित्युत्।नेतॄणाम्। एतस्य। वित्तात्। अधि। त्वा। स्थास्यति। देवः। त्वा। सविता। मध्वा। अनक्तु। सुपि
रस्प प्पला इति सु।पिप्पलाभ्यः। त्वा। ओषधीभ्यः। द्याम्। अग्रेण। अस्पृक्षः। आ। अन्तरिक्षम्। मध्येन। अप्राः। पृथिवीम्। ३०
उपरेण। अदृंहीः॥२॥ याः। ते। धामानि। उश्मसि। गमध्यै। यत्र। गावः। भूरिशृङ्गा इति भूरि।शृङ्गाः। अयासः।

अत्र। अह। तत्। उरुगायेत्युरुगायस्य। विष्णोः। परमम्। पदम्। अव। भाति। भूरि॥२॥ विष्णोः। कर्माणि। पश्यत।
यतः। व्रतानि। पस्पशे। इन्द्रस्य। युज्यः। सखा॥३॥ तत्। विष्णोः। परमम्। पदम्। सदा। पश्यन्ति। सूरयः। दिवीवेति दि-
वि। इव। चक्षुः। आततमित्याऽततम्॥६॥ परिवीरिति परि। वीः। असि। परि। त्वा। दैवीः। विशः। व्ययन्ताम्। परि। इमम्।
यजमानम्। रायः। मनुष्याणाम्। दिवः। सूनुः। असि। एषः। ते। पृथिव्याम्। लोकः। आरण्यः। ते। पशुः॥५॥ उपावीरि-
त्युपऽआवीः। असि। उप। देवान्। दैवीः। विशः। प्र। अगुः। उशिजः। वह्नितमानिति वह्निऽतमान्। देव। त्वष्टः। वसु। रम।
हव्या। ते। स्वदन्ताम्॥७॥ रेवतीः। रमध्वम्। बृहस्पते। धारय। वसूनि। ऋतस्य। त्वा। देवहविरिति देवऽहविः। पाशेन। प्र

ति। मुं। वा। मि। धर्षी। मा। नुषः। अग्नी। षोमाभ्याम्। जुष्टम्। नि। युनज्मि। अ। द्भ्यः। शं। यतु। भ्यः। त्वा। ओषधीभ्यः॥ ७॥ अपां। पेरुः।
असि। आपः। देवीः। स्वदं। तु। स्वात्तम्। चित्। सत्। देवहविरिति। देव। हविः। सम्। ता। प्राणेन। वातेन। गच्छताम्। अंगानि।
यजत्रैः। यज्ञपतिरितियज्ञ। पतिः। आ। शीषध्या। शीषा॥ ८॥ घृतेन। अक्तौ। पशून्। त्रायेथाम्। रेवति। यजमाने।
31 प्रियम्। धाः। आ। विश। उरोः। अंतरिक्षात्। सजूरितिस। जूः। देवेन। वातेन। अस्य। हविषः। त्मना। यज। सम्। अस्य।
तन्वा। तन्वा। वर्षिडितिवर्षि। वर्षीयसि। यज्ञे। यज्ञपतिमितियज्ञ। पतिम्। धाः। स्वाहा। देवेभ्यः। देवेभ्यः। स्वाहा॥ ९॥ मा। ३१
१ अ हिंः। स्तुः। मा। हृदा। ऊः। नमः। ते। आ। तानेत्या। तान। अनर्वा। इहि। घृतस्य। कुल्याः। उप। ऋतस्य। पथ्याः। अनु॥ १०॥

क॰ भागः । यजुः । पत्रांकः ३२

द्वीः । आपः । शुद्धाः । वोढम् । सुपरिविष्टा इति सु । परिविष्टाः । देवेषु । सुपरिविष्टा इति सु । परिविष्टाः । वयम् । परि
वेष्टार इति परि । वेष्टारः । भूयास्म ॥ ११ ॥ वाचम् । ते । शुंधामि । प्राणं । चक्षुः । श्रोत्रम् । नाभिम् । मेढ्रं । पायुम् । चरित्रा
न् ॥ १२ ॥ मनः । ते । आ । प्यायताम् । वाक् । ते । आ । प्यायताम् । प्राणः । ते । आ । प्यायताम् । चक्षुः । ते । आ । प्यायताम् । श्रोत्रम् । ते । आ । प्यायताम् । यत् । ते । क्रूरम् । यत् । आस्थितम् । तत् । ते । आ । प्यायताम् । निः
ष्ट्यायताम् । तत् । ते । शुद्ध्यतु । शम् । अहोभ्यः । ओषधे । त्रायस्व ॥ १३ ॥ निरस्तमिति निः । अस्तम् । रक्षः । इदम् । अहम् । रक्षः ।
अभि । तिष्ठामि । अवबाधे । अधमम् । तमः । नयामि । घृतेन । द्यावापृथिवी इति द्यावा । पृथिवी । प्र । ऊर्णुवाथाम् । वायो
इति वायो । वेः । स्तोकानाम् । अग्निः । आज्यस्य । वेतु । स्वाहा । स्वाहाकृते इति स्वाहा । कृते । ऊर्ध्वनभसमित्यूर्ध्व । नभसं ।

मारुतम्। गच्छतम्॥१४॥ इदम्। आपः। प्रवहत। अवद्यम्। च। मलम्। च। यत्। यत्। च। अभिदुद्रोहेत्यभि। द्रुद्रोह। अ
नृतम्। यत्। च। शेपे। अभीरुणम्। आपः। मा। तस्मात्। एनसः। पवमानः। च। मुंचतु॥१५॥ सम्। ते। मनः। मनसा। सम्।
32 प्राणः। प्राणेन। गच्छताम्। रेट्। असि। अग्निः। त्वा। श्रीणातु। आपः। त्वा। सम्। अरिणन्। वातस्य। त्वा। ध्रज्यै। पूष्णः।
रंह्यै। ऊष्मणः। व्यथिषत्। प्रयुतम्। इति प्रऽयुतम्। द्वेषः॥१६॥ घृतम्। घृतपावान इति घृतऽपावानः। पिबत। वसाम्।
वसापावान इति वसाऽपावानः। पिबत। अंतरिक्षस्य। हविः। असि। स्वाहा। दिशः। उद्दिश इत्युत्ऽदिशः। दिशः। दिश्य इति दि- ३२
कू। च्यः। स्वाहा॥१७॥ ऐंद्रः। प्राणः। अंगेअंगे इत्यंगेऽअंगे। नि। दीध्यत्। ऐंद्रः। उदान इत्युत्ऽआनः। अंगेअंगे इ

प्रदिश इति प्र। दिशः। आदिश इत्याऽदिशः।
विदिश इति वि। दिशः।

च्यां गा। अंगो। निधीत्इति नि। धीत्। नः। देवा। चक्षुः। सूरिः। ता। सꣳसमिति सम्। सम्। मा। सृज। संलिख्येति सं। त्वं। दूम। यत्। विष्णुरूपमिति विष्णु। रूपम्। नवत्ति। देवत्रे ति देवत्रा। यंतम्। अवस। सखायः। अनु। त्वा। माता। पितरः। मदंतु॥१८॥ समुद्रम्। गच्छ। स्वाहा। अंतरिक्षम्। देवम्। सवितारम्। मित्रावरुणौ। अहोरात्रे इत्यहोरात्रे। छंदाꣳसि। द्यावापृथिवी इति द्यावापृथिवी। यज्ञम्। सोमम्। दिव्यम्। नभः। अग्निम्। वैश्वानरम्। मनः। मे। हार्दि। यच्छ। दिवम्। ते। धूमः। गच्छतु। स्वः। ज्योतिः। पृथिवीम्। भस्मना। आपृण। स्वाहा॥२१॥ मा। आपः। मा। ओषधीः। हिꣳसीः। धाम्नो इति धाम्नः। धाम्नः। राजन्। ततः। वरुण। नः। मुंच। यत्। आहुः। अघ्न्याः इति वरुण। इति। शपामहे। सुमित्रिया इति सु। मित्रियाः। नः। आपः। ओषधयः।

अ॥२

संज्ञ। ऊर्म्मिं त्रियाइतिऊँ। मित्रियाः। तस्मि। संज्ञ॥२०॥ द्र विष्णुतीः। इमाः। आपः। द्र विष्णान्। आ॥ विवासति। द्र विष्णा
न्। आ॥ विवासति। द्र विष्णान्। देवः। अध्वरः। द्र विष्णान्। असु। सूर्याः॥२१॥ अग्नेः। वः। अपन्नगृहस्येयपन्न। शुंदस्यास
33 दसि। सादयामि। इंद्राग्न्योः। भागधेयी स्थितिभागधेयी। स्थ। मित्रावरुणयोः। विश्वेषाम्। देवानां। अन्नः। याः। उपा सूर्ये।
याभिर्वा सूर्यः। सहताः। नः। हिन्वंतु। अध्वरम्॥२२॥ हृदे। त्वा। मनसे। दिवे। सूर्याय। [illegible]म्। इमम्। अध्वरम्। दिवि। दे
वेषु। होत्राः। यच्छ॥२३॥ सोम। राजन्। विश्वाः। त्वम्। प्रजाइतिप्रजाः। उपावरोह। उपेत्युप। अवरोह। विश्वाः। त्वाम्। प्रजाः 33
इतिप्रजाः। उपावरोहंतु। उपेत्युप। अवरोहंतु। शृणोतु। अग्निः। समिधेतिसम्। इधा। हवम्। मे। शृण्वंतु। आपः। धिषणाः।

वा। देवीः। श्वो। ता। ग्रा। वाणः। विदुष्टरः। न। यज्ञम्। शृणोतु। देवः। सविता। हवम्। मे। स्वाहा॥ २४॥ देवीः। आपः। अपाम्। नपा
त्। यः। वः। ऊर्मिः। हविष्यः। इन्द्रियावान्। इन्द्रियवानितीन्द्रिय। वान्। मदिन्तमः। इति मदिन्। तमः। तम्। देवेभ्यः। देवत्रे
ति देव। त्रा। दत्त। शुक्रपेभ्यः। इति शुक्र। पेभ्यः। येषाम्। भागः। स्थ। स्वाहा॥ २५॥ कार्षिः। असि। समुद्रस्य। त्वा। अक्षि
त्यै। उत्। नयामि। सम्। आपः। अद्भिः। अग्मत। सम्। ओषधीभिः। ओषधीः॥ २६॥ यम्। अग्ने। पृत्स्विति पृत्।
सु। मर्त्यम्। अवाः। वाजेषु। यम्। जुनाः। सः। यन्ता। शश्वतीः। इषः। स्वाहा॥ २७॥ रावा। असि। गम्भीरम्। इमम्। अध्व
रम्। कृधि। इन्द्राय। सुषुतमम्। सुसुतमम् इति सु। सुतमम्। उत्तमेनेत्युत्। तमेन। पविना। ऊर्जस्वन्तम्। मधुमन्तम् इति

द्विप

मधु। मे। तम्। पयस्वंतम्। नियाभ्यास्थ इति नि। ग्राभ्याः। स्थ। देवश्रुत इति देव। श्रुतः। तर्पयत। मा। ॥ २८ ॥ मनः। मे। तर्प
यत। वाचम्। प्राणम्। चक्षुः। श्रोत्रम्। आत्मानम्। प्रजाम्। इति प्र। जाम्। पशून्। गणान्। गणाः। मे। मा। वितृषन्। ॥ २९ ॥
34 इंद्राय। त्वा। वसुमत इति वसु। मते। रुद्रवत इति रुद्र। वते। आदित्यवत इत्या। वते। अभिमातिघ्न इत्यभिमाति। घ्ने। ॥ ३० ॥
यत्। ते। सोम। दिवि। ज्योतिः। पृथिव्याम्। उरौ। अंतरिक्षे। तेन। अस्मै। यजमानाय। उरु। राये। कृधि। अधि। दात्रे। वो
चः। ॥ ३१ ॥ श्वात्राः। स्थ। वृत्रतुर इति वृत्र। तुरः। राधोगूर्त्ता इति राधः। गूर्ताः। अमृतस्य। पत्नीः। ताः। देवीः। देवत्रेति दे ३४
वा। त्रा। इमम्। यज्ञम्। नयत। उपहूता इत्युप। हूताः। सोमस्य। पिबत। ॥ ३२ ॥ ऊर्जम्। धत्त्व। धिषणे इति धिषणे।

वीड्वीड् इति वीड्वी। सतीइति सती। वीडयेथाम्। ऊर्जम्। दक्षयाम्। पाप्मा। इतः। न। सोमः। २३॥ प्राकू। अपाकू। उदकू। अ-
धराकू। सर्वतः। त्वा। दिशः। आ। धवंतु। अंब। निः। पर। सम्। अरीः। विदाम्॥ २४॥ त्वम्। अंग। प्र। शंसिषः। देवः। श। विश्व।
मर्त्यम्। न। त्वम्। अन्यः। मघवन्निति मघऽवन्। अस्ति। मर्डिता। इंद्र। ब्रवीमि। ते। वचः॥ २५॥ ॥ इति पदपाठे षष्ठो-
ध्यायः॥ ॥ वाचः। पतये। पवस्व। वृष्णः। अंशुभ्याम्। गभस्तिपूत इति गभस्तिऽपूतः। देवः। देवेभ्यः।
पवस्व। येषाम्। भागः। असि॥ १॥ मधुमत्तीरिति मधुऽमतीः। नः। इषः। कृधि। यत्। ते। सोम। अदाभ्यम्। नाम। जागृवि। त-
स्मै। ते। सोम। सोमाय। स्वाहा॥ २॥ स्वांकृत इति स्वाम्ऽकृतः। असि। विश्वेभ्यः। इंद्रियेभ्यः। दिव्येभ्यः। पार्थिवेभ्यः। मनः।

वा। अस्तु। स्वाहा। वा। सुभवेति सु। भव। सूर्याय। देवेभ्यः। त्वा। मरीचिपेभ्य इति मरीचि। पेभ्यः। देव। अंशो इत्यं
शो। यस्मै। त्वा। ईडे। तत्। सत्यम्। उपरिप्रुतेत्युपरि। प्रुता। भङ्गेन। हतः। असौ। फट्। प्राणाय। त्वा। व्यानायेति वि। आ
35 नाय। त्वा॥ ३॥ उपयामगृहीत इत्युपयाम। गृहीतः। असि। अन्तः। यच्छ। मघवन्निति मघ। वन्। पाहि। सोमम्। उरु
ष्य। रायः। आ। इषः। यजस्व॥ ४॥ अन्तरित्यन्तः। ते। द्यावापृथिवी इति द्यावापृथिवी। दधामि। अन्तः। दधामि। उरु।
अन्तरिक्षम्। सजूरिति सजूः। देवेभिः। अवरैः। परैः। च। अन्तर्याम इत्यन्तः। यामे। मघवन्निति मघ। वन्। माद। यस्व।
उदानायेत्युत्। आनाय। त्वा॥ ५॥ आ। वायो इति वायो। भूष। शुचिपा इति शुचि। पाः। उप। नः। सहस्रम्। ते। नियुत इति ३५
नि। युतः। विश्ववारेति विश्व। वार। उपो इत्युपो। ते। अन्धः। मद्यम्। अयामि। यस्य। देव। दधिषे। पूर्वपेयमिति पूर्व। पेयं।

वायवे।च्या॥६॥इंद्रवायूइतीद्रवायू।इमे।सुता।उप।प्रयो।भिरितिप्रयः।भिः।आ।गतम्।इंदवः।वाम्।उशंति।हि।
वायवे।इंद्रवायूस्थाम्।इतीद्रवायू।स्थाम्।वा।एव।ते।यो।निः।सजोषो।स्यामितिसजोषसः।स्याम्।वा॥७॥अयम्।वाम्।
मित्रावरुणा।सुतः।सोमः।ऋता।वृधा।ऋतवृध्येत्यृत।वृधा।इत।इत्।इद्धाः।श्रुतम्।हवम्।मित्रावरुणा।स्थाम्।वा॥८॥
राया।वयम्।ससवा।ऽंसइतिससवां।सः।मादेम।हव्येन।देवाः।यवसेन।गावः।ताम्।धेनुम्।मित्रावरुणा।युवम्।नः।विश्वाहा।धत्तम्।अनपस्फुरंतीमित्यन।पस्फुरंतीम्।ऋतायुस्थाम्।ऋतायुस्थामित्यृतस्थु।स्याम्।स्याम्।वा॥
९॥या।वाम्।कशा।मधुमतीतिमधुमती।अश्विना।सूनृतावतीतिसूनृता।वती।तया।यज्ञम्।मिमिक्षतम्।

अश्विना। मित्यश्विन्याम्। भवचा। माध्वी स्यां वा॥२०॥ नमूः। प्रत्नथेति प्रत्न। था। पूर्वथेति पूर्व। था। विश्वथेति विश्व।
था। इमथेति इम। था। ज्येष्ठतामिति ज्येष्ठ। तातिम्। बर्हिषदम्। बर्हिसदमिति बर्हि। सदम्। स्वर्विदमिति स्वः। वि
दम्। प्रतीचीनम्। वृजनम्। दोहसे। धुनिम्। आशुम्। जयतम्। अनु। या। सु। वर्द्धसे। त्रां। जय। चा। वीरताम्। पाहि।
36 अपमृधः। इयपा। मृधः। शा। एडः। देवाः। या। शुक्रपा इति शुक्र। पाः। आनयन्तु। अनाधृष्टा। असि॥२१॥ सुवीर इति सु। वी
रः। वीरान्। प्रजनयन्निति प्र। जनयन्। परि। इहि। अत्रि। रायः। पोषेण। यजमानम्। संजग्मान इति सम्। जग्मा ३६
नः। दिवा। पृथिव्या। शुक्रः। शुक्रशोचिषेति शुक्र। शोचिषा। निरस्त इति निः। अस्तः। शण्डः। शुक्रस्य। अधिष्ठानम्। अधि

स्थानमित्यधि।स्थानम्।असि॥१२॥अच्छिन्नस्य।ते।देव।सोम।सुवीर्यस्येति सु।वीर्यस्य।रायः।पोषस्य।ददितारः।
स्याम।सा।प्रथमा।संस्कृतिः।विश्ववारेति विश्व।वारा।सः।प्रथमः।वरुणः।मित्रः।अग्निः।१३॥सः।प्रथमः।बृहस्पतिः।
चिकित्वान्।तस्मै।इन्द्राय।सुतम्।आ।जुहोत।स्वाहा।तृम्पंतु।होत्राः।मध्वः।याः।स्विष्टा इति सु।इष्टाः।याः।सुप्रीता
इति सु।प्रीताः।सुहुता इति सु।हुताः।यत्।स्वाहा।अयाट्।अग्नीत्॥१४॥अयम्।वेनः।चोदयत्।पृश्निगर्भा इति पृ
श्नि।गर्भाः।ज्योतिर्जरायुरिति ज्योतिः।जरायुः।रजसः।विमान इति वि।माने।इमम्।अपाम्।संगम इति सम्।गमे।
सूर्यस्य।शिशुम्।न।विप्राः।मतिभिरिति मति।भिः।रिहन्ति।मर्कीया।चा॥१५॥मनः।न।येषु।हवनेषु।तिग्मम्।

विपः।रा।या।वरूथः।इवं।ताम्।आ।यः।य।आयौक्तिः।तु।विं।हम्ह।इतिउ।वि।हम्ह्ः।अस्य।अग्नी।गीत।आ।दिश।मि
ग्या।दिश।म्।ग।नस्तो।प्रजा।इति।प्र।जाः।पा।हि।अ।पमृ।इश्च।पा।मृष्ट्ः।मर्क्ः।दवो।या।मं।थि।पा।इति।मं।थि।पाः।अ
नयंउ।अनो।धृष्णा।अ।सि।१६॥सुप्रजा।इति।सु।प्रजाः।प्रजा।इति।प्र।जाः।प्रजन।यन्।नि।ति।प्र।जनयन्।परि।इहि
37 अ।त्रि।रायः।पो।षेण।यजमानम्।सं।जग्मान।इति।सम्।जग्मानः।दिवा।पृथिव्या।मं।थी।मं।थि।शो।विषेत्ति।मं।थि।शो
विषा।निरस्त।इति।निः।अस्तः।मर्कः।मं।थिनः।अधि।स्थानम्।अधि।स्थान।मित्यधि।स्थानम्।असि।१७॥ये।देवासः। ३१
दिवि।एका।दश।स्थ।ता।देवासः।यज्ञम्।इमम्।जुषध्वम्।हित।इय।सु।हितः।म।हिना।एका।दश।स्थ।ता।देवासः।यज्ञं

[illegible]

गृ रु

इममू। जुषध्वम्। दितइयम्। स्तितः। मदिना। एकादश। स्थ। दत्त। देवासः। यज्ञम्। इमम्। जुषध्वम्॥१८॥ आग्रयणः।
असि। स्वाग्रयण इति सु। आग्रयणः। पाहि। यज्ञम्। पाहि। यज्ञपतिमिति यज्ञ। पतिम्। विष्णुः। त्वाम्। इंद्रियेण। पातु।
विष्णुम्। त्वम्। पाहि। अभि। सवनानि। पाहि॥१९॥ सोमः। पवते। सोमः। पवते। अस्मै। ब्रह्मणे। क्षत्राय। सुन्वते। यज-
मानाय। इषे। ऊर्जे। अद्भ्यः इयत्। स्यः। ओषधीभ्यः। द्यावापृथिवीभ्याम्। सुभूतायेति सु। भूताय। विश्वेभ्यः। देवेभ्यः॥२०॥
इंद्राय। त्वा। बृहद्वत इति बृहत्। वते। वयस्वते। उक्थाव्यमिति उक्थ। अव्यम्। गृह्णामि। यत्। ते। इंद्र। बृहत्। वयः। तस्मै।
त्वा। विष्णवे। त्वा। उक्थेभ्यः। त्वा। देवेभ्यः। त्वा। देवाव्यमिति देव। अव्यम्। यज्ञस्य। आयुषे। गृह्णामि॥२१॥ मित्रावरुणा

न्यामु। इंद्राय। इंद्राग्नि न्यामितीइंद्राग्नि न्यामु। इंद्रावरुणा न्याम्। इंद्राबृहस्पति न्यामितीइंद्राबृहस्पति। न्यामु। इंद्रावि
ष्णुन्यामितीइंद्राविष्णु। न्याम॥२२॥ मूर्द्धानमु। दिवः। अरतिमु। पृथिव्याः। वैश्वानरमु। ऋते। आ। जातमु। अग्निमु। कवि
38 मु। संम्राजमितिसम्। राजमु। अतिथिम्। जनानाम्। आसन्। आ। पात्रम्। जनयंत। देवाः॥२३॥ ध्रुवः। असि। ध्रु
वक्षितिरितिध्रुव। क्षितिः। ध्रुवाणाम्। ध्रुवतमइतिध्रुवतमः। अच्युतानाम्। अच्युतक्षित्तमइत्यच्युतक्षित्तमः।
विश्वानराय। वा। ध्रुवम्। ध्रुवेण। मनसा। वाचा। सोमम्। अव। नयामि। अथ। नः। इंद्रः। इत्। विशः। असपत्नाः। समनस ३८
इतिस। मनसः। करत्॥२४॥ यः। ते। द्रप्सः। स्कंदति। यः। ते। अंशुः। ग्रावच्युतइतिग्राव। च्युतः। धिषणयोः। उपस्थादि

मः। सु। ते। निर्ऋते। इति निःऽऋते। तिग्मतेज इति तिग्मऽतेजः॥ अयस्मयम्। वि। चृत। बंधम्। यमेन। त्वम्। यम्या। संविदा एतं।
नेति सम्ऽविदा। उत्तम इत्युत्ऽतमे। नाके। अधि। रोहय। एनम्॥ ५४॥ यस्याः। ते। घोरे। आसन्। जुहोमि। एषाम्।
बंधनाम्। अवसर्जनायेत्यवऽसर्जनाय। याम्। जनः। भूमिः। इति। प्रमंदत इति प्रऽमंदते। निर्ऋतिम्। इति निःऽऋ वि॰ ४
तिः। आबबंधेत्याऽबबंध। पाशम्। ग्रीवासु। अविचृत्यमित्यविऽचृत्यम्। तम्। ते। वि। स्यामि। आयुषः। न। मध्यतः। अ ७६
थ। एतम्। पितुम्। अद्धि। प्रसूत इति प्रऽसूतः। नमः। भूत्यै। या। इदम्। चकार॥ ५६॥ निवेशन इति निऽवेशनः। संगमन
रत्वा। अहं। अरी। वसु। विश्वतः। ध्रा। ते। देवी। नि। सं। तारं। तु। नि। रं। ति।

इतिसम्। गमन्नः। वसूनाम्। विश्वा। रूपा। अग्निः। वक्षे। शची। भिः। देवइवेति देवः। इव। सविता। सत्यधर्मेतिसत्य। धर्मा।
इंद्रः। न। तस्थौ। समरइतिसम्। अरे। पथीनाम्। सीरा। युंजंति। कवयः। युगा। वि। तन्वते। पृथक्। धीराः। देवेषु। सुम्नयेति
सुम्न। या। ॥ ५९ ॥ युनक्त। सीरा। वि। युगा। तनुध्वम्। कृते। योनौ। वपत। इह। बीजम्। गिरा। च। श्रुष्टिः। सभराइतिस। भराः।
असत्। नः। नेदीयः। इत्। सृण्यः। पक्वम्। आ। इयात्। शुनम्। सु। फालाः। वि। कृषंतु। भूमिम्। शुनम्। कीनाशाः। अभि। यंतु।
वाहैः। शुनासीरा। हविषा। तोशमाना। सुपिप्पलाइतिसु। पिप्पलाः। ओषधीः। कर्तन। अस्मेइत्यस्मे॥ ६० ॥ घृतेन। सीता। मधुना।
सम्। अक्ताम्। विश्वैः। देवैः। अनुमतेत्यनु। मता। मरुद्भिरितिमरुत्। भिः। ऊर्जस्वती। पयसा। पिन्वमाना। अस्मान्। सीते।

पयसा।अत्रि।आ।वचस्व॥६१॥लांगलम्।पवीरवत्।सुशेव।इति।सु।शेवम्।सोमपित्सर्विति सोमपि।त्सरु।तत्।उत्।व
पति।गाम्।अविम्।प्रफर्व्यमिति प्र।फर्व्यम्।चापीवरीम्।प्रस्थावदिति प्रस्थ।वत्।रथवाहणम्।रथवाहनमिति रथ।वा
हनम्॥६२॥कामम्।कामदुघ इति काम।दुघा।धुक्ष्व।मित्राय।वरुणाय।च।इन्द्राय।अश्विभ्यामित्यश्वि।भ्याम्।पूष्णे।
प्रजाभ्य इति प्र।जाभ्यः।ओषधीभ्यः॥६३॥विमुच्यध्वम्।अघ्न्याः।देवयाना इति देव।यानाः।अगन्म।तमसः।पारम्।अ
स्य।ज्योतिः।आपाम॥६४॥सजूरिति स।जूः।अब्दः।अयवोभिरित्ययवः।भिः।उषाः।अरुणीभिः।सजोषसाविति स। ७७
जोषसौ।अश्विना॥६५॥सोभिरिति सः।भिः।सूरः।एतशेन।विश्वानरः।इडया।घृतेन।स्वाहा॥६६॥याः।ओषधीः।

सर्वाः।जाताः।देवेभ्यः।त्रियुगमितित्रि।युगम्।पुरा।मनै।नु।बभ्रूणाम्।अहम्।शतम्।धामानि।सप्त।च॥१॥श
तम्।वः।अंब।धामानि।सहस्रम्।उत।वः।रुहः।अध।शतक्रत्वइतिशत।क्रत्वः।यूयम्।इमम्।मे।अगदम्।कृत॥२॥
ओषधीः।प्रति।मोदध्वम्।पुष्पवतीरितिपुष्प।वतीः।प्रसूवरीरितिप्र।सूवरीः।अश्वाइवेत्यश्वाः।इव।सजित्वरीरितिस।
जित्वरीः।वीरुधः।पारयिष्णवः॥३॥ओषधीः।इति।मातरः।तत्।वः।देवीः।उप।ब्रुवे।सनेयम्।अश्वम्।गाम्।वासः।आत्मा
नम्।तव।पूरुष।पुरुषेतिपुरुष॥४॥अश्वत्थे।वः।निषदनम्।निसदनमितिनि।सदनम्।पर्णे।वः।वसतिः।कृता।गो
भाजइतिगो।भाजः।इत्।किल।असथ।यत्।सनवथ।पूरुषम्।पुरुषमितिपुरुषम्॥५॥यत्र।ओषधीः।समग्मतेति

78 समम्। अग्मत। राजानः। समिताविवेति समित्ता। इव। विप्रः मस्रः। उच्यते। त्रिषकारस्त्रोहेत्तिरस्त्रां। हा। अमीवचातनः
अमीवा चातनः॥७१॥ अश्वावतीम्। अश्ववतीमित्यश्वावतीम्। सोमावतीमिति सोमावतीम्। ऊर्जयंतीम्। उदोज
समित्यृतम्। ऊर्जसम्। आ। अविक्षि। सर्वाः। ओषधीः। आस्मै। अरिष्टतातये। अरिष्टतातये॥७२॥ उत। सुष्माः। ओ
षधीनाम्। गावः। गोष्ठादिव। गोस्थादिवेति गोस्थात्। इव। ईरते। धनम्। सनिष्यंतीनाम्। आत्मानम्। तव। पूरुषम्।
पूरुषेति पूरुष॥७३॥ इष्कृतिः। नाम। वः। माता। अथो इति अथो। यूयम्। स्थ। निष्कृतीः। निःकृतीरिति निः। कृतीः। सीराः। ७८
पतत्रिणीः। स्थन। यत्। आमयति। निः। कृथ॥७४॥ अति। विश्वाः। परिष्ठाः। परिस्था इति परि। स्थाः। स्तेनः इवेति स्तेनः। इ

वा । व्रजम् । अक्रमुः । ओषधीः । प्र । अचुच्यवुः । यत् । किम् । च । तन्वः । रपः ॥ १० ॥ यत् । इमाः । वाजयन् । अहम् । ओषधीः । हस्ते ।
आदध इति आऽदधे । आत्मा । यक्ष्मस्य । नश्यति । पुरा । जीवगृभ इति जीवऽगृभः । यथा ॥ ११ ॥ यस्य । ओषधीः । प्रसर्पथेति प्र ।
सर्पथ । अंगमंगमित्यंगम् । अंगम् । परुःऽपरुः । परुः । परुरिति परुः । परुः । ततः । यक्ष्मम् । वि । बाधध्वे । उग्रः । मध्यम
शीरिवेति मध्यमशीःऽइव ॥ १२ ॥ साकम् । यक्ष्म । प्र । पत । चाषेण । किकिदीविना । साकम् । वातस्य । ध्राज्या । साकम् । नश्य ।
निहाकयेति नि । हाकया ॥ १३ ॥ अन्या । वः । अन्याम् । अवतु । अन्या । अन्यस्याः । उप । अवत । ताः । सर्वाः । संविदाना इति स
म् । विदानाः । इदम् । मे । प्र । अवत । वचः ॥ १४ ॥ याः । फलिनीः । याः । अफलाः । अपुष्पाः । याः । च । पुष्पिणीः । बृहस्पतिप्रसू

ताइति बृहस्पति।प्रसूताः।ताः।नः।मुंचंतु।अंहसः।।१५।। मुंचंतु।मा।शपथ्यात्।अथो इति।वरुण्यात्।उत।अथो

इति।वरुण्यात्।उत।अथो इति।यमस्य।पड्बीशात्।सर्वस्मात्।देवकिल्बिषादिति देव।किल्बिषात्।।१६।। अव

79 पतंतीरित्यव।पतंतीः।अवदन्।दिवः।ओषधयः।परि।यम्।जीवम्।अश्नवामहै।न।सः।रिष्याति।पूरुषः।पुरु

षः इति पुरुषः।।१७।। याः।ओषधीः।सोमराज्ञीरिति सोम।राज्ञीः।बह्वीः।शतविचक्षणा इति शत।विचक्षणाः।तासाम्।

असि।त्वम्।उत्तमा।अरम्।कामाय।शम्।हृदे।।१८।। विष्ठिताः।विस्थिता इति वि।स्थिताः।पृथिवीम्।अनु।बृह ७ओ।।

स्पतिप्रसूता इति बृहस्पति।प्रसूताः।अस्यै।सम्।दत्त।वीर्यम्।।१९।। याः।च।इदम्।उपशृण्वंतीत्युप।शृण्वंति।याः।

वा। दूरम्। पराऽगता। इति परा। गताः। सर्वाः। संगत्येति सम्। गत्या। वीरुधः।।८५।। मा। वः। रिषत्। खनिता। यस्मै। च। अहम्।
खनामि। वः। द्विपादिति द्वि। पात्। चतुष्पात्। चतुः। पादिति चतुः। पात्। अस्माकम्। सर्वम्। अस्तु। अनातुरम्।।८६।। ओष
धयः। सम्। अवदन्त। सोमेन। सह। राज्ञा।। यस्मै। कृणोति। ब्राह्मणः। तम्। राजन्। पारयामसि।।८७।। नाशयित्री। ब
लासस्य। अर्शसः। उपचितामित्युप। चिताम्। असि। अथो इत्यथो। शतस्य। यक्ष्माणाम्। पाकारोरिति पाक। अरोः। असि
नाशनी।।८८।। त्वाम्। गंधर्वाः। अखनन्। त्वाम्। इंद्रः। बृहस्पतिः। ओषधे। सोमः। राजा।। विद्वान्। यक्ष्मात्। अमुच्यत।।८९।।

सहस्वामा। अरातीः। सहस्व। पृतनायत इति पृतना। यतः। सहस्व। सर्वम्। पाप्मानम्। सहमाना। असि। ओषधे॥ ९०॥
दीर्घायुरिति दीर्घ। आयुः। ते। ओषधे। खनिता। यस्मै। च। त्वा। खनामि। अहम्। अथो इति। त्वम्। दीर्घायुरिति
८० दीर्घ। आयुः। भूत्वा। शतवल्शेति शत। वल्शा। वि। रोहतात्॥ ९१॥ त्वम्। उत्तमा। असि। ओषधे। तव। वृ
क्षाः। उपस्तयः। उपस्तिः। अस्तु। सः। अस्माकम्। यः। अस्मान्। अभिदासतीत्यभि। दासति॥ ९२॥ मा। मा। हिंसीत्। ८०
जनिता। यः। पृथिव्याः। यः। वा। दिवम्। सत्यधर्मेति सत्य। धर्मा। वि। आनट्। यः। च। अपः। चन्द्राः। प्रथमः। जजान।

कस्मै।देवाय।हविषा।विधेम॥५३॥ अग्नि।आवर्तस्व।पृथिवि।यज्ञो।न।पयसा।सह।वपाम्।ते।अग्निः।इषि
तः।अरोहत्॥५४॥ अग्ने।यत्।ते।शुक्रम्।चंद्रम्।पूतम्।च।यज्ञियम्।तत्।देवेभ्यः।भरामसि॥५५॥इषम्।ऊ
र्जम्।अहम्।इतः।आदम्।ऋतस्य।योनिम्।महिषस्य।धाराम्।आ।मा।गोषु।विशतु।आ।तनूषु।जहामि।स
पनिराष दिम्।[illegible] अनमीवाम्।अग्ने।तव।श्रवः।वयः।महि।भ्राजंते।अर्चयः।विभावसो इति विभाऽवसो।बृहद्भानो इति बृहत्
६६॥२ ऽभानो।शवसा।वाजम्।उक्थ्यम्।दधासि।दाशुषे।कवे॥५६॥ पावकवर्चा इति पावकऽवर्चाः।शुक्रवर्चा इति शुक्रऽव
र्चाः।अनूनवर्चा इति अनूनऽवर्चाः।उत्।इयर्षि।भानुना।पुत्रः।मातरा।विचरन्निति विऽचरन्।उप।अवसि।पृणक्षि।रो

दसीइति रोदसी । उभेइत्यस्फले ॥ ९८ ॥ ऊर्जः । नपात् । जातवेदइति जात । वेदः । सुशस्तिभिरिति सुशस्ति । भिः । मंद
स्व । धीतिभिरिति धीति । भिः । हितः । वेइतिवे । इषः । सम् । दधुः । भूरिवर्पसइति भूरि । वर्पसः । चित्रोतयइति चित्र । ऊ
तयः । वामजाताइतिवाम । जाताः ॥ ९९ ॥ इरज्यन् । अग्ने । प्रथयस्व । जंतुभिरिति जंतु । भिः । अस्मेइत्यस्मे । रायः । अ
मर्त्य । सः । दर्शतस्य । वपुषः । वि । राजसि । पृणक्षि । सानसिम् । क्रतुम् ॥ १०० ॥ इष्कर्तारम् । अध्वरस्य । प्रचेतसमिति प्र । ५२
चेतसम् । क्षयंतम् । राधसः । महः । रातिम् । वामस्य । सुभगामिति सु । भगाम् । महीम् । इषम् । दधासि । सानसिम् । ८२
रयिम् ॥ १०१ ॥ ऋतावानम् । ऋतवानमित्यृत । वानम् । महिषम् । विश्वदर्शतमिति विश्व । दर्शतम् । अग्निम् । सुम्नाय ।

81

दधिरे। पुरः। जनाः। ऋकर्म्मितिऋत। कर्मम्। सप्रथस्तममितिसप्रथः। तमम्। त्वा। गिरा। दैव्याम्। मानुषा। युगा।
१०२॥ आ। प्यायस्व। समृ। एतु। ते। विश्वतः। सोम। वृष्ण्यम्। भव। वाजस्य। संगथ इतिसम्। गथे॥१०३॥ सम्। ते। पयां
सि। सम्। उं इ। यन्तु। वाजाः। वृष्ण्यानि। अभिमातिषाह इत्यभिमातिसह। आप्यायमान इत्या
प्यायमानः। अमृताय। सोम। दिवि। श्रवांसि। उत्तमानीत्युत्। तमानि। धिष्व॥१०४॥ आ। प्यायस्व। मदिंतमेतिमदि
न्तम। सोम। विश्वेभिः। अंशुभिरित्यंशुभिः। नवा। नः। सप्रथस्तममितिसप्रथः तमः। सखा। वृधे॥१०५॥ आ।
त्ता। वसः। मनः। यमत्। परमात्। चित्। सधस्थादितिसधस्थात्। अग्ने। त्वांकामयेतित्वाम। कामया। गिरा॥१०६॥

उपमूंताः । अंगिरस्वन्मेध्यांगिरः । तम । विश्वाः । सुहित इति सु । हितयः । पृथक् । अग्ने । कामया । यमिरे ॥ २०७ ॥
अग्निः । प्रियेषु । धामस्विति धामसु । कामः । ऋतस्य । भव्यस्य । सम्राडिति सम् । राट् । एकः । वि । राजतीति ॥ २०८ ॥ ॥
इति संहितापदपाठे द्वादशोध्यायः ॥ ॥ मयि । गृह्णामि । अग्रे । अग्निम् । रायः । पोषाय । सुप्रजास्त्वायेति सु । प्रजाः ।
त्वाय । सुवीर्यायेति सु । वीर्याय । माम् । ॐ इष्टूं । देवताः । सचंताम् ॥ १ ॥ ब्रह्म । जज्ञानम् । प्रथमम् । पुरस्तात् । वि । सी
मतः । सुरुच इति सु । रुचः । वेनः । आवः । सः । बुध्न्याः । उपमाः । उप । माः । अस्य । विष्ठाः । विस्था इति वि । स्थाः । ८२
सतः । च । योनिम् । असतः । च । वि । वरिति वः ॥ २ ॥ हिरण्यगर्भ इति हिरण्य । गर्भः । सम् । अवर्तत । अग्रे । भूतस्य । जातः ।

घाम्। इमम्। वा। योनिम्। अनु। अयः। च। पूर्वः। समानम्। योनिम्। अनु। संचरंतमिति सम्ऽचरंतम्। द्रप्सम्। जुहोमि। अनु। सप्त। होत्राः॥ ४॥ नमः।
अस्तु। सर्पेभ्यः। ये। के। च। पृथिवीम्। अनु॥ उलि १

83 पतिः। एकः। आसीत्। सः। दाधार। पृथिवीम्। द्याम्। उत। इमाम्॥ ४॥ द्रप्सः। चस्कंद। पृथिवीम्। अनु। ये। अंतरिक्षे।
ये। दिवि। तेभ्यः। सर्पेभ्यः। नमः॥ ५॥ याः। इषवः। यातुधानानामिति यातु। धानानाम्। ये। वा। वनस्पतीन्। अनु। ये। वा।
अवटेषु। शेरते॥ ६॥ ये। वा। अमी इति। रोचने। दिवः। ये। वा। सूर्यस्य। रश्मिषु। येषाम्। अप्स्वित्यप्। सु। सदः। कृत
म्॥ ७॥ कृणुष्व। पाजः। प्रसितिमिति प्र। सितिम्। न। पृथ्वीम्। याहि। राजेवेति राजा। इव। अमवानित्यम। वान्।
इभेन। तृष्वीम्। अनु। प्रसितिमिति प्र। सितिम्। द्रूणानः। अस्ता। असि। विध्य। रक्षसः। तपिष्ठैः॥ ८॥ तव। भ्रमासः।
आशुयेत्याशु। या। पतंति। अनु। स्पृश। धृषता। शोशुचानः। तपूंषि। अग्ने। जुह्वा। पतंगान्। असंदित इत्यसम्।

दितः। विऽसृज। विष्वक्। उल्काः॥९॥ प्रति। स्पशः। वि। सृज। तूर्णिऽतमः इति तूर्णिऽतमः। भव। पायुः। विशः। अस्याः।
अदब्धः। यः। नः। दूरे। अघऽशंसः। यः। अन्ति। अग्ने। माकिः। ते। व्यथिः। आ। दधर्षीत्॥१०॥ उत्। अग्ने। ति-
३८ ष्ठ। प्रति। आ। तनुष्व। नि। अमित्रान्। ओषतात्। तिग्मऽहेते इति तिग्मऽहेते। यः। नः। अरातिम्। सम्ऽइधान इति सम्ऽइधान।
चक्रे। नीचा। तम्। धक्षि। अतसम्। न। शुष्कम्॥११॥ ऊर्ध्वः। भव। प्रति। विध्य। अधि। अस्मत्। आविः। कृणुष्व। दैव्यानि।
अग्ने। अव। स्थिरा। तनुहि। यातुऽजूनाम् इति यातुऽजूनाम्। जामिम्। अजामिम्। प्र। मृणीहि। शत्रून्। अग्नेः। वा। तेजसा। ८३
सादयामि। इन्द्रस्य। वा। ओजसा। सादयामि॥१२॥ स्तुवः। यज्ञस्य। रजसः। च। नेता। यत्र। नियुत्ऽभिः इति नियुत्ऽभिः॥

भिः । सवसः । शिवाभिः । दिवि । मूर्द्धानम् । दधिषे । स्वर्षाम् । स्वः । सामिति स्वः । साम् । जिह्वाम् । अग्ने । चकृषे । हव्यवा
हमिति हव्य । वाहम् ।२३। ध्रुवा । असि । धरुणा । आस्तृतेत्या । स्तृता । विश्वकर्मणेति विश्व । कर्मणा । मा । त्वा । समुद्रः ।
उत् । वधीत् । मा । सुपर्ण इति सु । पर्णः । अव्यथमाना । पृथिवीम् । दृंह ।२४। प्रजापतिरिति प्रजा । पतिः । त्वा । सादयतु । अ
पाम् । पृष्ठे । समुद्रस्य । एमन् । व्यचस्वतीम् । प्रथस्वतीम् । प्रथस्व । पृथिवी । असि ।२५। भूः । भूमिः । असि । अदितिः । विश्व
धाया इति विश्व । धायाः । विश्वस्य । भुवनस्य । धर्त्री । पृथिवीम् । यच्छ । दृंह । मा । हिंसीः ।२६। विश्वस्मै । प्राणाय ।
अपानायेत्यप । आनाय । व्यानायेति वि । आनाय । उदानायेत्युत् । आनाय । प्रतिष्ठायै । प्रतिष्ठाया इति प्रति । स्थायै ।

84

वारिचाय। अग्निः। चात्र्त्नि। पात्र। मत्र्या। स्वस्त्या। वर्हिषा। ग्रां तमेनेति शर्म्मं तमेन॥१८॥ कांडात्कांडादिति
कांडात्। कांडात्। प्ररोहंतीति प्र रोहंती। परुषः परुष इति परुषः परुषः। परि। एव। नः। दूर्वे। प्र। तनु। सहस्रेण
शतेन। च। या। शतेन। प्रतनोषीति प्र तनोषि। सहस्रेण। विरोहसीति वि रोहसि। तस्याः। ते। देवि। इष्टके।
विधेम। हविषा। वयम्॥१९॥ याः। ते। अग्ने। सूर्ये। रुचः। दिवम्। आतन्वंतीया। तन्वंति। रश्मिभिरिति र
श्मि भिः। ताभिः। नः। अद्य। सर्वाभिः। रुचे। जनाय। नः। कृधि॥२०॥ याः। वः। देवाः। सूर्ये। रुचः। गोषु। अश्वेषु। ८४
याः। रुचः। इंद्राग्नी इतींद्राग्नी। ताभिः। सर्वाभिः। रुचं। नः। धत्त। बृहस्पते॥२१॥ विराडिति वि राट्।

ज्योतिः।अधारयत्।स्वराडितिस्वःराट्।ज्योतिः।अधारयत्।पृष्ठे।पृथिव्याः।ज्योतिष्मतीम्।विश्वम्।ज्योतिः।
यच्छ।अग्निः।तेअधिपतिरित्यधिपतिः॥२२॥मधुः।च।माधवः।च।च।वासंतिकौ।ऋतूइत्यृतू।अग्नेः।अंतः।श्ले
षः।असि।कल्पेताम्।द्यावापृथिवीइतिद्यावापृथिवीकल्पंताम्।आपः।ओषधयः।कल्पंताम्।अ
ग्नयः।पृथक्।मम।ज्यैष्ठ्याय।सव्रताइतिसऽव्रताः।ये।अग्नयः।समनसइतिसऽमनसः।अंतरा।द्यावापृथिवी
इतिद्यावापृथिवी।इमे।इतीमे।वासंतिकौ।ऋतूइत्यृतू।अभिकल्पमानाइत्यभि।कल्पमानाः।कल्पमानाः।इं
द्रमिवेतीद्रम्।इव।देवाः।अभिसंविशंत्वित्यभि।संविशंतु।ध्रुवेइतिध्रुवे।सीदतम्॥२३॥अषाढा।असि।सह

85 मा।ना।सहस्व।अरातीः।सहस्व।पृतनायत इति पृतनऽयतः।सहस्रवीर्येति सहस्रऽवीर्या।असि।सा।मा।
जिन्व।।२४।।मधु।वाताः।ऋतायत इति ऋतऽयतः।मधु।क्षरंति।सिंधवः।माध्वीः।नः।संतु।ओषधीः।।२५।।म
धु।नक्तम्।उत।उषसः।मधुमदिति मधुऽमत्।पार्थिवम्।रजः।मधु।द्यौः।अस्तु।नः।पिता।।२६।।मधुमानिति म
धुऽमान्।नः।वनस्पतिः।मधुमानिति मधुऽमान्।अस्तु।सूर्यः।माध्वीः।गावः।भवंतु।नः।।२७।।अपाम्।गंभन्।सी
द।मा।त्वा।सूर्यः।अभि।ताप्सीत्।मा।अग्निः।वैश्वानरः।अच्छिन्नपत्रा इत्यच्छिन्नऽपत्राः।प्रजा इति प्रऽजाः।अ ८५
नु।वीक्षस्वेति।अनु।वीक्षस्व।अनु।त्वा।दिव्या।वृष्टिः।सचताम्।।२८।।त्रीन्।समुद्रान्।सम्।असृपत्।स्वर्गानिति

त्रिष्टुवेतित्रि।स्तुप्।३ पदुष्टुप्

स्वः। गान्। अपाम्। पतिः। वृषभः। इष्टकानाम्। पुरीषम्। वसानः। सुकृतस्येति सु। कृतस्य। लोके। तत्र। गच्छ। यत्र।
पूर्वे। परेता इति परा। इताः। २९। इतः। जज्ञे। प्रथमम्। एभ्यः। योनिभ्य इति। योनि। भ्यः। अधि। जातवेदा इति।
जात। वेदाः। सः। गायत्र्या। त्रिष्टुभा। अनुष्टुभेत्यनु। स्तुभा। च। देवेभ्यः। हव्यम्। वहतु। प्रजानन्निति प्र। जानन्।
इषे। राये। रमस्व। सहसे। द्युम्ने। ऊर्जे। अपत्याय। सम्राडिति सम्। राट्। असि। स्वराडिति स्व। राट्। असि। सारस्व
तौ। त्वा। उत्सौ। प्र। अवताम्॥३१॥ अग्ने। युक्ष्व। हि। ये। तव। अश्वासः। देव। साधवः। अरम्। वहन्ति। मन्यवे॥३२॥ युक्ष्व। हि।
देवहूतमानिति देव। हूतमान्। अश्वान्। अग्ने। रथीरिवेति रथीः। इव। नि। होता। पूर्व्यः। सदः॥३३॥ सम्यक्। स्र

४७

वंति। सरितः। न। धेनाः। अंतः। हृदा। मनसा। पूयमानाः। घृतस्य। धाराः। अभि। चाकशीमि। हिरण्ययः। वेतसः।
मध्ये। अग्नेः। ॥२४॥ रुचे। वा। रुचे। त्वा। आसे। ज्योतिषा। अन्तः। इदम्। विश्वस्य। भुवनस्य। वाजिनम्। अग्नेः। वैश्वान
रस्य। सु॥२५॥ अग्निः। ज्योतिषा। ज्योतिष्मान्। रुक्मः। वर्चसा। वर्चस्वान्। सहस्रदा इति सहस्र। दाः। असि।
सहस्राय। त्वा॥२६॥ आदित्यम्। गर्भम्। पयसा। सम्। अंक्ति। सहस्रस्य। प्रतिमामिति प्रति। माम्। विश्वरू
पमिति विश्व। रूपम्। परि। वृङ्धि। हरसा। मा। अभि। मंस्थाः। शतायुषमिति शत। आयुषम्। कृणुहि। ची ८६
यमानः॥२७॥ वातस्य। जूतिम्। वरुणस्य। नाभिम्। अश्वम्। जज्ञानम्। सरिरस्य। मध्ये। शिशुम्। नदीनाम्। हरि

म्। अद्रिबुध्नमित्यद्रिऽबुध्नम्। अग्नेः। मा। हिंसीः। परमे। व्योमन्निति विऽओमन्॥ ४२॥ अजस्रम्। इन्दुम्। अरुषम्।
भुरण्युम्। अग्निम्। ईडे। पूर्वचित्तिमिति पूर्वऽचित्तिम्। नमोभिरिति नमःऽभिः। सः। पर्वभिरिति पर्वऽभिः। ऋतुश इत्यृ-
तुऽशः। कल्पमानः। गाम्। मा। हिंसीः। अदितिम्। विराजमिति विऽराजम्॥ ४३॥ वरूत्रीम्। त्वष्टुः। वरुणस्य। नाभि-
म्। अविम्। जज्ञानाम्। रजसः। परस्मात्। महीम्। साहस्रीम्। असुरस्य। मायाम्॥ ४४॥ यः। अग्निः। अग्नेः। अधि। अजाय- भूयोः।
त। शोकात्। पृथिव्याः। उत। वा। दिवः। परि। येन। प्रजा इति प्रऽजाः। विश्वकर्मेति विश्वऽकर्मा। जजान। तम्। अग्ने। हेडः।
परि। ते। वृणक्तु॥ ४५॥ इमम्। मा। हिंसीः। द्विपादमिति द्विऽपादम्। पशुम्। सहस्राक्ष इति सहस्रऽअक्षः। मेधाय। चीय-

मा । नः । मयुम् । पशुम् । मेधम् । अग्ने । जुषस्व । तेन । चिन्वानः । तन्वः । नि । सीद । मयुम् । ते । शुक् । ऋच्छतु । यम् । द्वि
ष्मः । तम् । ते । शुक् । ऋच्छतु ॥४७॥ एकशफमित्येक । शफम् । कनिक्रदम् । वाजिनम् । वाजिनेष्विति वाजिनेषु । गौरम् । आरण्यम् ।
87 अनु । ते । दिशामि ॥४८॥ साहस्रम् । शतधारमिति शत । धारम् । उत्सम् । व्यच्यमानमिति वि । अच्यमानम् । सरिर
स्य । मध्ये । घृतम् । दुहानाम् । अदितिम् । जनाय । गवयम् ॥४४॥ ऊर्णायुम् । वरुणस्य । नाभिम् । त्वचम् । पशूना
म् । द्विपदामिति द्वि । पदाम् । चतुष्पदाम् । चतुः । पदामिति चतुः । पदाम् । त्वष्टुः । प्रजानामिति प्र । जानाम् । प्रथ
मम् । जनित्रम् । उष्ट्रम् ॥४५॥ अजः । हि । अग्नेः । अजनिष्ट । शोकात् । सः । अपश्यत् । जनितारम् । अग्रे । तेन । देवाः ।

।देवता॑म्। अ॒ग्रम्। आ॒य॑न्। तेन॑। रोह॑म्। आ॒य॑न्। उप॑। मेध्या॑सः। आ॒रभ॑म्॥४६॥ त्वम्। आ॒यविष्ठ। दाशुषः। नॄन्। पा॒हि। शृ॒
णु॒धि। गिरः॑। रक्ष॑। तोक॑म्। उ॒त। त्मना॑। अ॒पाम्। त्वा॒। एम॑न्। सा॒दयामि। ओद्मन्। भस्मन्। ज्योतिषि। अयने। अर्णवे।
सदने। समुद्रे। सरिरे। क्षये। सधिषि। सदने। सधस्थे। सधस्थ इति सधऽस्थे। योनौ। पुरीषे। पाथसि। पाङ्ढेन॥४८॥ अय
म्। पुरः। भुवः। तस्य। प्राणः। भौवायन इति भौवऽआयनः। वसन्तः। प्राणायन इति प्राणऽआयनः। गायत्री। वासन्ती।
गायत्र्यै। गायत्रम्। गायत्रात्। उपांशुः। उपांशुरित्युपऽअंशुः। उपांशोः। उपांशोरित्युपऽअंशोः। त्रिवृदिति त्रिऽवृत्। त्रिवृतः। त्रिवृत इति त्रि
वृतः। रथन्तरम्। रथन्तरमिति रथम्ऽतरम्। वसिष्ठः। ऋषिः। प्रजापतिगृहीतयेति प्रजापतिऽगृहीतया। त्वया। प्राणम्। गृह्णामि।

प्रजाप्य इति प्र। जाप्यः॥ ४९॥ दक्षिणा। विश्वकर्मेति विश्व। कर्मा। मनः। विश्वकर्माणमिति विश्वं कर्माणम्। ग्रीष्मः। मान
सः। त्रिष्टुप्। त्रिस्तुबिति त्रि। स्तुप्। ऐष्मी। त्रिष्टुभः। त्रिस्तुभ इति त्रि। स्तुभः। स्वारम्। स्वारात्। अंतर्याम इत्यंतः। यामः। अंत
र्यामादित्यंतः। यामात्। पंचदश इति पंच। दशः। पंचदशादिति पंच। दशात्। बृहत्। भरद्वाजः इति भरत्। वाजः। मनः।
॥ ५०॥ पश्चात्। विश्वव्यचा इति विश्व। व्यचाः। चक्षुः। विश्वव्यचसमिति विश्व। व्यचसम्। वर्षाः। वार्षी इति जगती॥ वा
र्षी॥ जगत्याः। ऋक्सममिति ऋक्। समम्। ऋक्समादिति ऋक्। समात्। शुक्रः। शुक्रात्। सप्तदश इति सप्त। दशात्। वैरूप ७७
म्। जमदग्निरिति जमत्। अग्निः। चक्षुः॥ ५१॥ इदम्। उत्तरात्। स्वरिति स्वः। श्रोत्रम्। सौवम्। शरत्। श्रोत्री। अनुष्टुप्। अ

वा
सप्तदशादिति सप्त। दशात्।

अनुष्टुप्छिन्दंगाल्पप्रगारदी। अनुष्टुब्भर्गः॥१

नुस्तो। नइ यँनु। सुनः। ए ऽडम्। ए ऽदात्। मंथी। मंथिनः। एव्कविँ ऽशाइ त्येत्। विँ ऽशः। एव्कविँ ऽशादित्येक्। विँ ऽशात्। विराजम्।
विश्या। मित्रः। म्रात्रैम्॥ ।५२॥ इयम्। उपरिमतिः। तस्यै। वाक्। माच्या। हेमंतः। वा चः। पङ्क्तिः। हेमंती। पङ्क्त्यै। निधनेवदिति
निधना वत्। निधनेवतैः इति निधना वतः। आग्रयणः। आग्रयणात्। त्रियणाव त्रयस्त्रिँ ऽशौ। त्रिनव त्रयस्त्रिँ ऽशाविति
ति त्रिनव त्रयस्त्रिँ ऽशौ। त्रिणव त्रयस्त्रिँ ऽशाभ्याम्। त्रिनव त्रयस्त्रिँ ऽशाभ्यामिति त्रिनव त्रयस्त्रिँ ऽशाभ्याम्। शाक्व
रारेवतइति शाक्वररेवते। विश्वकर्मेति विश्वाकर्मा। वावम्। लोकम्। ताः। इंद्रम्॥ ।५८॥ ॥इति संहितापदपाठे त्रयोद
शाध्यायः॥ ॥ध्रुवक्षितिरिति ध्रुव ऽक्षितिः। ध्रुवयोनिरिति ध्रुव ऽयोनिः। ध्रुवा। असि। ध्रुवम्। योनिम्। आ। सीद। साधुयेति सा
ति

धु।या।उख्यस्य।केतुम्।प्रथमम्।जुषाणा।अश्विना।अध्वर्यू इत्यध्वर्यू।सादयताम्।इह।त्वा॥१॥कुलायिनी।घृत
वतीति घृतऽवती।पुरंधिरिति पुरम्ऽधिः।स्योना।सीद।सदने।पृथिव्याः।अभि।त्वा।रुद्राः।वसवः।गृणन्तु।इमा।ब्रह्म
८९ पीपिहि।सौभगाय॥२॥स्वैः।दक्षैः।दक्षपितेति दक्षऽपिता।इह।सीद।देवानाम्।सुम्ने।बृहते।रणाय।पितेवेति पि
ताऽइव।एधि।सूनवे।आ।सुशेवेति सुऽशेवा।स्वावेशेति सुऽआवेशा।तन्वा।सम्।विशस्व॥३॥पृथिव्याः।पुरीषम्।अ
सि।अप्सः।नाम।ताम्।त्वा।विश्वे।अभि।गृणन्तु।देवाः।स्तोमपृष्ठेति स्तोमऽपृष्ठा।घृतवतीति घृतऽवती।इह।सीद।प्रजावदि ८९
ति प्रजाऽवत्।अस्मे इति।द्रविणा।आ।यजस्व॥४॥अदित्याः।त्वा।पृष्ठे।सादयामि।अन्तरिक्षस्य।धर्त्रीम्।विष्टं

नेनीम्। दिशाम्। अधिपत्नीमित्यधिपत्नीम्। भुवनानाम्। ऊर्मिः। द्रप्सः। अपाम्। असि। विश्वकर्मेति विश्वाऽकर्मा। ते। ऋषिः।
श्रुतः। स्तुविनिग्रेष्ठाः॥५॥ सजूरिति स।जूः। ऋतुभिरित्यृतु।भिः। विधाभिरिति वि।धाभिः। देवैः। देवैः। वयोनाधैरिति
वयः।नाधैः। अग्नाय्या। वा। विश्वानराय। वसुभिरिति वसु।भिः। रुद्रैः। आदित्यैः। विश्वैः। देवैः॥६॥ प्राणम्। मे। पाहि। अ
पानमित्यप। आनम्। व्यानमिति वि। आनम्। चक्षुः। उर्व्या। वि। भाहि। श्रोत्रम्। श्लोकय। अपः। पिन्व। ओषधीः। जिन्व।
द्विपादिति द्वि।पात्। अव। चतुष्पात्। चतुःपादिति चतुः।पात्। पाहि। दिवः। वृष्टिम्। आ। ईरय॥७॥ मूर्द्धा। वयः। प्रजा
पतिरिति प्रजा।पतिः। छन्दः। क्षत्रम्। मयंदम्। विष्टम्भः। अधिपतिरित्यधि।पतिः। विश्वकर्मेति विश्व।कर्मा। परमेष्ठी। प

रमेस्थी। तिपरमेस्थी॥ बस्तः। विवलमितिवि। वलम्। दृष्टिः। विशालमितिवि। शालम्। पुरुषः। तंद्रम्। व्याघ्रः। अनाधृ
ष्टम्। सिंहः। छदिः। पष्ठवाडितिपष्ठ। वाट्। बृहती। उक्षा। ककुप्। ऋषभः। सतोबृहतीतिसतः। बृहती॥८॥ अन
90 ड्वान्। पङ्क्तिः। धेनुः। जगती। त्र्यविरितित्रि। अविः। त्रिष्टुप्। त्रिस्तुबितित्रि। स्तुप्। दित्यवाडितिदित्य। वाट्। विराडितिवि
राट्। पंचाविरितिपंच। अविः। गायत्री। त्रिवत्सइतित्रि। वत्सः। उष्णिक्। तुर्यवाडितितुर्य। वाट्। अनुष्टुप्। अनुस्तुबित्य
नुस्तुप्॥९॥ इन्द्राग्नीइतीन्द्राग्नी। अव्यथमानाम्। इष्टकाम्। दृंहतम्। युवम्। पृष्ठेन। द्यावापृथिवीइतिद्यावा। ९०
पृथिवी। अन्तरिक्षम्। च। वि। बाधसे। विश्वकर्मेतिविश्व। कर्मा। त्वा। सादयतु। अन्तरिक्षस्य। अन्तरिक्षम्। वायुः॥१०॥

राज्ञी। असि। प्राची। दिक्। विरा डिति विराट्। दक्षिणा। संम्राडिति सम्राट्। प्रतीची। स्वरा डिति स्वराट्। उदी
ची। अधिपत्नी याधि। पत्नी। बृहती। नभः। नभस्यः। वार्षिकौ। इषः। ऊर्जः। शारदौ॥ ११॥ आयुः। मे। पाहि। प्राणम्। मे।
अपानमित्यपा। आनम्। व्यानमिति वि। आनम्। चक्षुः। श्रोत्रम्। वाचम्। पिन्व। मनः। जिन्व। आत्मानम्। पाहि। ज्योतिः।
यच्छ॥ १२॥ मा। छंदः। प्रमेति प्र। मा। प्रतिमेति प्रति। मा। अस्त्रीवयः। पङ्क्तिः। उष्णिक्। बृहती। अनुष्टुप्। अनुस्तु बित्यनु।
स्तुप्। विरा डिति विराट्। गायत्री। त्रिष्टुप्। त्रिस्तु बिति त्रि। स्तुप्। जगती॥ १३॥ पृथिवी। अंतरिक्षम्। द्यौः। समाः। नक्षत्रा
णि। वाक्। मनः। कृषिः। हिरण्यम्। गौः। अजाः। अश्वः॥ १४॥ अग्निः। देवता। वातः। सूर्यः। चंद्रमाः। वसवः। रुद्राः। आदि

91

या॰।मरुतः।विश्वे।देवाः।बृहस्पतिः।इन्द्रः।वरुणः॥२०॥मूर्द्धा।असि।राट्।ध्रुवा।धरुणा।धर्त्री।धरणी।आयु
ष।त्वा।वर्च्चसे।कृष्यै।क्षेमाय॥२१॥यन्त्री।राट्।यन्त्री।यमनी।ध्रुवा।धरित्री।इषे।ऊर्जे।रय्यै।पोषाय॥२२॥आशुः
त्रिवृदितित्रि।वृत्।भान्तः।पंचदशइतिपंच।दशः।व्योमेतिवि।ओमा।सप्तदशइतिसप्त।दशः।धरुणः।एकविंशइत्येक
विंशः।प्रतूर्त्तिरितिप्र।तूर्त्तिः।अष्टादशइत्यष्टा।दशः।तपः।नवदशइतिनव।दशः।अभीवर्त्तइत्यभि।वर्त्तः।स अभीवर्तः
विंशइतिस।विंशः।वर्च्चः।द्वाविंशः।संभरणइतिसम्।भरणः।त्रयोविंशइतित्रयः।विंशः।योनिः।चतु ९२
र्विंशइतिचतुः।विंशः।गर्भाः।पंचविंशइतिपंच।विंशः।ओजः।त्रिणवः।त्रिनवइतित्रि।नवः।क्रतुः।एकत्रिं

शाइत्येकं। त्रि॰ शः। प्रतिष्ठा। प्रतिस्थेति प्रति। स्था। त्रयस्त्रिं॰ शाइति त्रयः। त्रि॰ शः। ब्रध्नस्य। विष्टपम्। चतुस्त्रिं॰
शाइति चतुः। त्रि॰ शः। नाकः। षट्त्रिं॰ शाइति षट्। त्रि॰ शः। विवर्तइति वि। वर्तः। अष्टाचत्वारिं॰ शाइत्यष्टा। चत्वारिं॰ शः।
धर्त्रम्। चतुष्टोमः। चतुस्तोमइति चतुः। स्तोमः। १४। अग्नेः। नागः। असिदीक्षायाः। आधिपत्यमित्याधिपत्यम्।
ब्रह्म। स्पृतम्। त्रिवृदिति त्रि। वृत्। स्तोमः। इंद्रस्य। विष्णोः। क्षत्रम्। पंचदशाइति पंच। दश। नृ॰ बृहत्साममिति नृ। बृ
हत्साम्। धर्मचतुः। ऊर्जनित्रम्। सप्तदशाइति सप्त। दशः। मित्रस्य। वरुणस्य। दिवः। वृष्टिः। वातः। स्पृतः। एकविं॰ शाइत्ये
कं। विं॰ शः। २६। वसूनाम्। रुद्राणाम्। चतुष्पात्तेचतुः। पादिति चतुः। पात्। चतुर्विं॰ शाइति चतुः। विं॰ शः। आदित्याना

मू।म् स्तोम्।गर्भाः।स्पृताः।पंचवि७श इति पंचाविं७शाः।अदित्यै।पुष्टिः।उअं।त्रिणवः।त्रिनव इति त्रि।नवः।देवस्य।
92 सवितुः।बृहस्पतेः।समीची।दिश्यं स्पृताः।चतुष्टोमः।चतुस्तोम इति चतुः।स्तोमः॥२०॥यवानाम्।अयवाना
म्।प्रजा इति प्र।जाः।चतुश्चत्वारि७श इति चतुः।चत्वारि७शः।ऋतूनाम्।विश्वेषाम्।देवानाम्।ऋतम्।त्रयस्त्रि
सहस्र ७श इति त्रयः।त्रि७शः।सद्रं।दिम इति को॥२१॥एकया।अस्तुवत।प्रजा इति प्र।जाः।अधीयंत।प्रजापतिरिति ९
प्रजा।पतिः।अधिपतिरित्यधि।पतिः।आसीत्।तिसृभिरिति तिसृ।भिः।ब्रह्म।असृज्यत।ब्रह्मणः।पतिः।पं ९२
चभिरिति पंच।भिः।भूतानि।असृज्यंत।भूतानाम्।सप्तभिरिति सप्त।भिः।सप्तऋषय इति सप्त।ऋषयः।

धृता ॥२२॥ नवभिरितिनव । भिः । पितरः । अदितिः । अधिपत्नीत्यधि । पत्नी । एकादशभिरित्येकादश । भिः ।
ऋतवः । आर्तवाः । अधिपतय इत्यधि । पतयः । आसन् । त्रयोदशभिरिति त्रयोदश । भिः । मासाः । संवत्सरः । पंच
दशभिरिति पंचदश । भिः । क्षत्रम् । इन्द्रः । सप्तदशभिरिति सप्त । दश । भिः । ग्राम्याः । पशवः । बृहस्पतिः ॥२३॥ नवद
शभिरिति नवदश । भिः । शूद्रार्यौ । असृज्येताम् । अहोरात्रे इत्यहोरात्रे । अधिपत्नी इत्यधि । पत्नी । आस्ताम् । एक
विंशत्येत्येक । विंशत्या । एकशफा इत्येक । शफाः । वरुणः । त्रय्या विंशत्येति त्रयः । विंशत्या । क्षुद्राः ।
पूषा । पंचविंशत्येति पंच । विंशत्या । आरण्याः । वायुः । सप्तविंशत्येति सप्त । विंशत्या । आरण्याः । वायुः ।

सप्तविꣳशत्येतिसप्त। विꣳशत्या। द्यावापृथिवीइतिद्यावापृथिवी। विश्वे। एताम्। वसवः। रुद्राः। आदित्याः।
अनुव्याः। अनुव्यायन्नित्यनु। व्यायन्। ताः। एव। ॥२४॥ नवविꣳशत्येतिनव। विꣳशत्या। वनस्पतयः। सोमः।
93 एकत्रिꣳशतेत्येक। त्रिꣳशता। प्रजाइतिप्र। जाः। यवाः। च। अयवाः। च। त्रयस्त्रिꣳशतेतित्रयः। त्रिꣳशता।
भूतानि। अशाम्यन्। प्रजापतिरितिप्रजा। पतिः। परमेष्ठी। परमेष्ठीतिपरमे। स्थी॥२५॥ ॥इतिसंहिता १
पदपाठेचतुर्दशोध्यायः॥ ॥अग्ने। जातान्। प्र। नुद। नः। सपत्नान्। प्रति। अजातान्। नुद। जा ८३
तवेदइतिजात। वेदः। अधि। नः। ब्रूहि। सुमनाइतिसु। मनाः। अहेडन्। तव। स्याम। शर्मन्। त्रिवरूथइति

स्वप नानि तिस्रा पश्चानि तिस्रा वन्ता द्दा
ति। अपसा तारा नात वेदऽश्यं तात। वेद

त्रि। वरूथ्ये। उद्गा विस्तृत। जो॥ १॥ सद्रसा। जातान्। व्रानुदा नः। नुदस्व। अधिनः। ब्रूहि। सुमतस्यमानः इति
सु। मनस्यमानः॥ २॥ षोडशी। स्तोमः। ओजः। द्रविणम्। चतुश्चत्वारिंशः इति चतुः। चत्वारिंशः। स्तोमः। वर्चः।
द्रविणम्। अग्नेः॥ ३॥ एवः। छन्दः। वरिवः। अन्त्रः रिति त्रि। मान्त्रः। परित्रः रिति परि। त्रः। आच्छद्दिया। छत्। मनः। व्यचः। सि
धुः। समुद्रः। सरिरम्। ककुप्। त्रिककुप् इति त्रि। ककुप्। काव्यम्। अङ्कूपम्। अक्षरपङ्क्तिः। स्थिराक्षरा। पङ्क्तिः। पद
पङ्क्तिः रिति पद। पङ्क्तिः। विष्टारपङ्क्तिः। विस्तारपङ्क्तिः रिति विस्तार। पङ्क्तिः। क्षुरः। भ्रजः॥ ४॥ आच्छद्दिया। छत्।
प्रच्छद् इति प्र। छत्। संयद् इति सम्। यत्। वियद् इति वि। यत्। बृहत्। रथन्तरम् इति रथम्। तरम्। निकामः इति नि।

कायः। विवध इति वि। वधः। गिरः। स्वजाः। सँ स्तुबिति सम्। स्तुप्। अनुष्टुप्। अनुस्तुबित्यनु। स्तुप्। एवः। व
रिवः। वयः। वयस्कृत्। वयः कृदिति वयः। कृत्। विष्पर्द्धाः। विस्पर्द्धा इति वि। स्पर्द्धाः। विशालम्। विशालमिति वि। शालम्।
९५ छर्दिः। इरोहृणमिति हुः। रोहृणम्। तं इमम्। अर्कं कामित्यर्क। अर्कम्। पा। रश्मिना। सत्याय। सत्यम्। जिन्व। प्रे
तिनेति प्र। इतिना। धर्मणा। धर्मम्। अन्वित्येत्यनु। इत्या। दिवा। दिवम्। संधिनेति सम्। धिना। अंतरिक्षेण। अंत
रिक्षम्। प्रतिधिनेति प्रति। धिना। पृथिव्या। पृथिवीम्। विष्टंभेन। वृष्ट्या। वृष्टिम्। प्रवयेति प्र। वया। अह्ना। अ ९५
हः। अनुयेत्यनु। या। रात्र्या। रात्रिम्। उशिजा। वसुभ्य इति वसु। भ्यः। वसून्। प्रकेतेनेति प्र। केतेन। आदित्येभ्यः॥

अध्यायीत भिक्षये भीत

आदित्यान्॥ ह्वः॥ तं त्रु ना॥ रायः॥ पोषेण॥ रायः पोषम्॥ सं॰॥ सर्पेणेति सम्॥ सर्पेण॥ ऋतायो॥ ऋतम्॥ ए॰ इन॥
र्दुषधीभिः॥ र्दुषधीः॥ उत्तमेनेत्युत्॥ तमेन॥ तन्नृभिः॥ तन्नृः॥ वयोधसेति वयः॥ सधम॥ अधीतानयः॥ धीतम्॥ अभिजि
तेत्यभि॥ जिता॥ तजसा॥ तेजः॥ ७॥ प्रतिपदिति प्रति॥ पत॥ असि॥ प्रतिपदइति प्रति॥ पाद॥ वा॥ अनुपदित्यनु॥ पद॥ अनुपाद त्यनुपद
संपदिति सम्॥ पत॥ संपदिति सम्॥ पाद॥ तेजः॥ तेजसे॥ ८॥ त्रिवृदिति त्रि॥ वृत्॥ त्रिवृतइति त्रि॥ वृते॥ प्रवृदिति
प्र॥ वृत्॥ प्रवृतइति प्र॥ वृते॥ विवृदिति वि॥ वृत्॥ विवृतइति वि॥ वृते॥ संवृदिति सं॥ वृत्॥ संवृतइति सं॥ वृते॥ आक्रम
इत्या॥ क्रमः॥ आक्रमायेत्या॥ क्रमाय॥ संक्रमइति सम्॥ क्रमः॥ संक्रमायेति सम्॥ क्रमाय॥ उत्क्रमइत्युत्॥ क्रमः॥ उत्क्रा॥

प्रतिधर्त्रीतिप्रति।धर्ता।त्रिवृदितित्रि।वृत्।त्वा।स्तोमः।पृथिव्याम्।

मायेत्युत।क्रमाय।उत्क्रांतिरित्युत्।क्रांतिः।उत्क्रांत्याइत्युत्।क्रांत्यै।अधिपतिनेत्यधि।पतिना।ऊर्जा।ऊर्जम्।
॥९॥राज्ञी।असि।प्राची।दिक्।वसवः।ते।देवाः।अधिपतयइत्यधि।पतयः।अग्निः।हेतीनाम्।श्रयतु।आ
95 ज्यम्।उक्थम्।अव्यथायै।स्तभ्नातु।रथंतरमितिरथं।तरम्।साम।प्रतिष्ठित्यै।प्रतिस्थित्याइतिप्रति।स्थित्यै।
अंतरिक्षे।ऋषयः।त्वा।प्रथमजाइतिप्रथम।जाः।देवेषु।दिवः।मात्रया।वरिम्णा।प्रथंतु।विधर्तेतिवि।धर्ता।च। ९५
अयम्।अधिपतिरित्यधिपतिः।च।ते।त्वा।सर्वे।संविदानाइतिसम्।विदानाः।नाकस्य।पृष्ठे।स्वर्गइतिस्वः।गे।लो
के।यजमानम्।च।सादयंतु॥१०॥विराडितिवि।राट्।दक्षिणा।रुद्राः।इंद्रः।पंचदशइतिपंच।दशः।प्रउगम्।बृ

हन्।।२१।।संम्राडितिसम्।राट्।पत्नीवी।आदित्याः।वसवः।सम्राडितिसम्राट्।दशं।मरुत्वतीयम्।।विरू
पम्।।२२।।स्वराडितिस्वाराट्।नदीवी।मरुतः।सोमः।एकविंशाइत्येकः।विंशाः।निष्केवल्यम्।निःकेवल्यमिति
निःकेवल्यम्।विराजम्।।२३।।अधिपत्नीत्यधिपत्नी।बृहती।विश्वेदेवाः।बृहस्पतिः।त्रिणवत्रयस्त्रिंशौ।त्रिन
वत्रयस्त्रिंशाविति त्रिनवत्रयस्त्रिंशौ।वा।स्तोमौ।अयताम्।वैश्वदेवाग्निमारुते इति वैश्वदेवाग्निमारुते।
उक्थे इत्युक्थे।अव्यथाय्यै।स्तन्नीनाम।शाक्वररैवते इति शाक्वररैवते।सामनी इति सामनी।।२४।।अयम्।पुरः।
हरिकेश इति हरिऽकेशः।सूर्यरश्मिरिति सूर्यऽरश्मिः।तस्य।रथगृत्स इति रथऽगृत्सः।च।रथौजा इति रथऽओजाः।

वा। सेनानीग्रामण्यौ। सेनानीग्रामण्याविति सेनानी। ग्रामण्यौ। पुंजिकस्थलेति पुंजिक। स्थला। चा। क्रतुस्थले
ति क्रतु। स्थला। च। अप्सरसौ। दंक्ष्णवः। पशवः। हेतिः। पौरुषेयः। वधः। प्रहेतिरिति प्र। हेतिः। तेभ्यः। नमः। अ
स्तु। ते। नः। अवंतु। ते। नः। मृडयंतु। ते। यम्। द्विष्मः। यः। च। नः। द्वेष्टि। तम्। एषाम्। जंभे। दध्मः।।१५।। दक्षिणा। विश्वक
र्मेति विश्व। कर्म्मा। रथस्वन इति रथ। स्वनः। रथेचित्र इति रथे। चित्रः। मेनका। सहजन्येति सह। जन्या। यातुधाना इ
ति यातु। धानाः। रक्षांसि।।१६।। पश्चात्। विश्वव्यचा इति विश्व। व्यचाः। रथप्रोत इति रथ। प्रोतः। असमरथ
इत्यसम। रथः। प्रम्लोचंतीति प्र। म्लोचंती। अनुम्लोचंतीत्यनु। म्लोचंती। व्याघ्राः। सर्प्पाः।।१७।। उत्तरात्। संय

हस्तुरिलिसंयत । वसुः । तार्क्ष्यः । अरिष्टनेमिरित्यरिष्ट । नेमिः । विश्वाची । घृताची । आपः । वातः ॥ १८ ॥ नपरिइ
अर्वाग्वसुरित्यर्वाक् । वसुः । सेनजिदिति सेन । जित् । सुषेणः । सुसेन इति सु । सेनः । उर्वशी । पूर्वचित्तिरिति पूर्व
चित्तिः । अवस्फूर्जन्नित्यव । स्फूर्जन् । विद्युदिति वि । द्युत ॥ १९ ॥ अयम् । अग्निः । सहस्रिणः । वाजस्य । शतिनः । पतिः । मू
र्द्धा । कविः । रयीणाम् ॥ २० ॥ अबोधि । अग्निः । समिधेति सम् । इधा । जनानाम् । प्रति । धेनुमिवेति धेनुम् । इव । आयती
मित्या । यतीम् । उषासम् । उषसमित्युषसम् । यह्वा इवेति यह्वाः । इव । प्र । वयाम् । उज्जिहाना इत्युत् । जिहा
नाः । प्र । भानवः । सिस्रते । नाकम् । अच्छ ॥ २१ ॥ आवाचाम । कवयो । मध्यमया । वचः । वंदारु । वृषभाय । वृष्णे । गवि

97 ष्ठिरः। नमसा। स्तोमम्। अग्नौ। दिवीवेति दिविऽइव। रुक्मम्। उरुव्यंचमित्युरुऽव्यंचम्। अश्रेत्॥२२॥ जनस्य। गोपाः।
अजनिष्ट। जागृविः। अग्निः। सुदक्ष इति सुऽदक्षः। सुविताय। नव्यसे। घृतप्रतीक इति घृतऽप्रतीकः। बृहता। दिवि
स्पृशेति दिविऽस्पृशा। द्युमदिति द्युऽमत्। वि। भाति। भरतेभ्यः। शुचिः॥२३॥ त्वाम्। अग्ने। अंगिरसः। गुहा।
हितम्। अनु। अविंदन्। शिश्रियाणम्। वनेवन इति वनेऽवने। सः। जायसे। मथ्यमानः। सहः। महत्। त्वाम्। आ
हुः। सहसः। पुत्रम्। अंगिरः॥२४॥ सखायः। सम्। वः। सम्यंचम्। इषम्। स्तोमम्। च। अग्नये। वर्षिष्ठाय। क्षिती ९७
नाम्। ऊर्जः। नप्त्रे। सहस्वते॥२५॥ सऽसमिति सम्ऽसम्। इत्। युवसे। वृषन्। अग्ने। विश्वानि। अर्यः। आ। इडः। प

।दा। सम्ऽइद्धः। से। सः। नः। वसूनि। आ। भर॥ २६॥ वाम्। चित्रऽश्रवस्तमम्। इति चित्रऽश्रवःऽतमम्। देवऽवीता। विश्वाऽजं। तवःऽशो
विष्ठेऽराम्॥ ज्ञा। विः। कऽरामिति शोविः। कऽराम्। पुरुऽप्रिय इति पुरु। प्रिय। अग्ने। हव्याय। वोढवे॥ २७॥ एना। वः
अग्निम्। नमसा। ऊर्जः। नपातम्। आ। हुवे। प्रियम्। चेतिष्ठम्। अरतिम्। स्वध्वरमिति सु। अध्वरम्। विश्वस्य।
दूतम्। अमृतम्॥ २८॥ सः। योजते। अरुषा। विश्वभोजसेति विश्वऽभोजसा। सः। दुद्रवत्। स्वाहुत इति सु। आहु
तः॥ २९॥ सुब्रह्मेति सु। ब्रह्मा। यज्ञः। सुशमीति सु। शमी। वसूनाम्। देवम्। राधः। जनानाम्॥ ३०॥ अग्ने। वाजस्य।
गोमत इति गोऽमतः। ईशानः। सहसः। यहो इति यहो। अस्मे इति अस्मे। धेहि। जातवेद इति जातऽवेदः। महि। श्रवः।

॥ ३१॥ सः। इधानः। वसुः। कविः। अग्निः। ईडेन्यः। गिरा। रेवत्। अस्मभ्यम्। पुर्वणीक। पुर्वणीकेति पुरुऽअनीक। दी-
दिहि॥ ३२॥ क्षपः। राजन्। उत। त्मना। अग्ने। वस्तोः। उत। उषसः। सः। तिग्मऽजंभ। तिग्मजंभेति तिग्मऽजंभ। रक्षसः। दह।
प्रति॥ ३३॥ नृद्दः। नः। अग्निः। आकृतइया। द्कृतः। नद्गा। रातिः। सुजगेति सु। नगा। नद्दः। अध्वरः। निद्राः। वता। प्र-
शस्तयइति प्रऽशस्तयः॥ ३४॥ नुद्रम्। आमनः। अणु। क्षत्रस्य। इति क्षत्र। तुर्यै। यत। समस्थि तिसमऽऋौत। सुः। सास-
हः। ससहइति ससहः॥ ३५॥ अवत। स्थिरा। तनुहि। भूरि। शर्धताम्। वनेम। ते। अभिष्टिभिः। अभिष्टिभिरित्यभिष्टिऽभिः॥ ३६॥
अग्निम्। तम्। मन्ये। यः। वसुः। अस्तम्। यम्। यन्ति। धेनवः। अस्तम्। अर्वन्तः। आशवः। अस्तम्। नित्यासः। वाजिनः। ६८

इषम्।स्तोतृभ्यइतिस्तोतृऽभ्यः।आ।भर॥३७॥सः।अग्निः।यः।वसुः।गृणे।सम्।यम्।आयंतीत्याऽयंति।धेनवः।
सम्।अर्वंतः।रघुद्रुवइतिरघुऽद्रुवः।सम्।सुजाताइतिसुऽजाताः।सूरयः॥३८॥त्वेइत्यग्ने।सुश्चंद्र।सुचंद्रे
तिसु।चंद्र।सर्पिषः।दर्वीइतिदर्वी।श्रीणीषे।आसनि।उतोइत्युतो।नः।उत्।पुपूर्याः।उक्थेभिः।शवसः।पते
॥३९॥अग्ने।तम्।अद्य।अश्वम्।न।स्तोमैः।क्रतुम्।न।भद्रम्।हृदिस्पृशमितिहृदिऽस्पृशम्।ऋध्याम।ते।ओहैः।
॥४०॥अध।हि।अग्ने।क्रतोः।भद्रस्य।दक्षस्य।साधोः।रथीः।ऋतस्य।बृहतः।बभूथ॥४१॥एभिः।नः।अर्कैः।भव।
नः।अर्वाङ्।स्वः।न।ज्योतिः।अग्ने।विश्वेभिः।सुमनाइतिसुऽमनाः।अनीकैः॥४२॥अग्निम्।होतारम्।मन्ये।दास्वंतं

ग्ने।

तमू। वसुमू। सूनुमू। सहसः। जातवेदसमिति जात। वेदसमू। विप्रमू। न। जातवेदसमिति जात। वेदसमू। यः।

ऊर्ध्वया। स्वध्वर इति सु। अध्वरः। देवः। देवाच्या। कृपा। घृतस्य। विभ्राष्टिमिति वि। भ्राष्टिम्। अनु। वष्टि। शोचिषा।

आजुह्वानस्य। आ। जुह्वानस्य। सर्पिषः॥४३॥ येन। ऋषयः। तपसा। सत्रम्। आयन्। इन्धानाः। अग्निम्। स्वः। आ।

९१ भरन्तः। तस्मिन्। अहम्। नि। दधे। नाके। अग्निम्। यम्। आहुः। मनवः। स्तीर्णबर्हिषमिति स्तीर्ण। बर्हिषम्॥४४॥

तमू। पत्नीभिः। अनु। गच्छेम। देवाः। पुत्रैः। भ्रातृभिरिति भ्रातृ। भिः। उत। वा। हिरण्यैः। नाकम्। गृभ्णानाः। सुकृतस्येति लेलि॥

सु। कृतस्य। लोके। तृतीये। पृष्ठे। अधि। रोचने। दिवः॥४५॥ आ। वाचः। मध्यम्। अरुहत्। भुरण्युः। अयम्। अग्निः। स

पति॰

त्वतिति रितिसत। चेकितानः। पृष्ठे। पृथिव्याः। निहितमइतिनि। हितं। दविद्युतत्। अधस्पादम्। अधःपदमितियधः
पदम्। कृणुताम्। आय। उतंन्यवः॥४६॥ अयम्। अग्निः। वीरतमइतिवीरऽतमः। वयोधाइतिवयः। धाः। सहस्त्रियः
द्योततांम्। अप्रयुच्छन्नित्यप्रऽयुच्छन्। विभ्राजमानइतिवि। भ्राजमानः। सरिरस्य। मध्ये। उप। प्र। याया। दिव्यानि। दि
व्यानि। धाम॥४७॥ संप्रच्यवध्वमितिसम्। प्रच्यवध्वम्। उप। संप्रयातेतिसम्। प्रयात। अग्ने। पथः। देवयानानामि
तिदेव। यानान्। कृणुध्वम्। पुनरितिपुनः। कृण्वाना। पितरा। युवाना। अन्वातां७सीदित्यनु। आतां७सीत्। त्वयि।
तंतुम्। एतम्॥४८॥ उत्। बुध्यस्व। अग्ने। प्रति। जागृहि। त्वम्। इष्टापूर्तेइतीष्टापूर्ते। समा। सृजेथाम्। अयम्। च।

अस्मिन्। सधस्थ इति सध। स्थे। अधि। उत्तरस्मिन्नित्युत्। तरस्मिन्। विश्वे। देवाः। यजमानः। च। आसीदत॥ ४९॥
येन। वहसि। सहस्रम्। येन। अग्ने। सर्ववेदसमिति सर्व। वेदसम्। तेन। इमम्। यज्ञम्। नः। नय। स्वः। देवेषु। गन्तवे।
तपः। तपस्यां। मेग्रा। गिरो। परमेष्ठी। परमेष्ठीति परमे। स्थी। दिवः। सूर्यः॥ ५०॥ प्रोथत्। अश्वः। न। यवसे। अविष्यन्।
यदा। महः। संवरणादिति सम्। वरणात्। वि। अस्थात्। आत्। अस्य। वातः। अनु। वाति। शोचिः। अध। स्म। ते।
व्रजनम्। कृष्णम्। अस्ति॥ ५१॥ आयोः। त्वा। सदने। सादयामि। अवतः। छायायाम्। समुद्रस्य। हृदये। रश्मीवतीम्। १००
रश्मीवतीमिति रश्मि। वतीम्। भास्वतीम्। आ। या। द्याम्। भासि। आ। पृथिवीम्। आ। उरु। अन्तरिक्षम्। परमेष्ठी।

श्रा २

परमेस्ठीति परमे।स्ठी। दिवम्।आक्रचोऽइति द्विवोसीदतम्।।५२।। सहस्रस्यैति सहस्र प्रमेति प्र।मा।अस्रि प्रतिमेति

प्रति।मा।उन्मेत्युत्।मा।साहस्रः।सहस्राय।चा।।५३।। ।।इति संहितापदपाठे पंचदशोध्यायः।। ।। ।।

नमः।ते।रुद्र।मन्यवे।उतोऽइत्युतो।ते।इषवे।नमः।बाहुभ्यामिति बाहु।भ्याम्।उत।ते।नमः।।१।।या।ते।रुद्र।

शिवा।तनूः।अघोरा।अपापकाशिनीत्यपापाकाशिनी।तया।नः।तन्वा।शंतमयेति शम्।तमया।गिरिशंतेति गि

रि।शंत।अभि।चाकशीहि।।२।।याम्।इषुम्।गिरिशंतेति गिरि।शंत।हस्ते।बिभर्षि।अस्तवे।शिवाम्।गिरित्र

तिगिरि।त्रां।ता।हस्तेम्।कुरु।मा।हिंसीः।पुरुषम्।जगत्।।३।।शिवेन।वचसा।त्वा।गिरिशेति गिरि।शा।

अच्छ। वदामसि। यथा। नः। सर्वम्। इत्। जगत्। अयक्ष्मम्। सुमना इति सु। मनाः। असत्॥४॥ अधि। अवोचत्।
अधिवक्तेत्यधि। वक्ता। प्रथमः। दैव्यः। भिषक्। अहीन्। च। सर्वान्। जम्भयन्। सर्वाः। च। यातुधान्य इति यातु। धा
न्यः। अधराचीः। परा। सुव॥५॥ असौ। यः। ताम्रः। अरुणः। उत। बभ्रुः। सुमंगल इति सु। मंगलः। ये। च। एनम्। रु
द्राः। अभितः। दिक्षु। श्रिताः। सहस्रश इति सहस्र। शः। अव। एषाम्। हेडः। ईमहे॥६॥ असौ। यः। अवसर्पती
त्यव। सर्पति। नीलग्रीव इति नील। ग्रीवः। विलोहित इति वि। लोहितः। उत। एनम्। गोपाः। अदृश्रन्। अदृश्रन्। २०२
उदहार्य इत्युद। हार्यः। सः। दृष्टः। मृडयाति। नः॥७॥ नमः। अस्तु। नीलग्रीवायेति नील। ग्रीवाय। सहस्राक्षायेति सह

स्त्वा। अस्ताय। मीढुषे। अथो इत्यथो। ये। अस्य। सत्वानः। अहम्। तेभ्यः। अकरम्। नमः॥ ७॥ प्र। मुंच। धन्वनः। त्वम्। उभ
योः। आर्त्न्योः। ज्याम्। याः। च। ते। हस्ते। इषवः। परा। ताः। भगव इति भग। वः। वप॥ ८॥ विज्य मिति वि। ज्यम्। ध
नुः। कपर्द्दिनः। विशल्य इति वि। शल्यः। बाणवानिति बाण। वान्। उत। अनेशन्। अस्य। याः। इषवः। आभुः। अ
स्य। निषंगधिरिति निषंग। धिः॥ १०॥ या। ते। हेतिः। मीढुष्टम। मीढुस्तमेति मीढुः। तम। हस्ते। बभूव। ते। धनुः।
तया। अस्मान्। विश्वतः। ~~त्व थो इत्यथो~~या। परि। भुज॥ ११॥ परि। ते। धन्वनः। हेतिः। अस्मान्। वृणक्तु। विश्व
तः। अथो इत्यथो। यः। इषुधिरितीषु। धिः। तव। आरे। अस्मान्। नि। धेहि। तम्॥ १२॥ अवतत्येत्यव। तत्य। धनुः

ले। अपमर्शया २

वम्। सहस्राक्षेति सहस्रऽअक्षः। शतेषुधइति शतऽइषुधे। निशीर्येति निऽशीर्य। शल्यानाम्। मुखा।
शिवः। नः। सुमनाइति सुऽमनाः। भव॥२३॥ नमः। ते। आयुधाय। अनातताय। धृष्णवे। उभाभ्याम्। उत। ते। न
102 मः। बाहुभ्यामिति बाहुऽभ्याम्। तव। धन्वने॥२४॥ मा। नः। महान्तम्। उत। अर्भकम्। उक्षन्तम्। उक्षितम्। व
धीः। पितरम्। मातरम्। प्रियाः। तन्वः। रुद्र। रीरिषः। रिरिषइति रिरिषः॥२५॥ तोके। तनये। आयुषि। गोषु।
अश्वेषु। रीरिषः। रिरिषइति रिरिषः। वीरान्। रुद्र। भामिनः। वधीः। हविष्मन्तः। सदम्। इत्। त्वा। हवामहे॥ १०२
॥२६॥ हिरण्यबाहवइति हिरण्यऽबाहवे। सेनान्यइति सेनाऽन्ये। दिशाम्। च। पतये। वृक्षेभ्यः। हरिकेशेभ्य

य इति हरि। केशेभ्यः पशूनाम्। शष्पिंजराय त्विषीमते। त्विषिमत इति त्विषि। मते। पथीनाम्। हरिकेशाये
ति हरि। केशाय। उपवीति न इत्युपावीतिने। पुष्टानाम्॥ १७॥ बभ्लुशाय। व्याधिने। अन्नानाम्। भवस्य। हे
त्यै। जगताम्। रुद्राय। आततायिन इत्याततायिने। क्षेत्राणाम्। सूताय। अहंत्यै। वनानाम्॥ १८॥ रोहिता
य। स्थपतये। वृक्षाणाम्। भुवंतये। वारिवस्कृताय। वारिवः कृतायेति वारिवः। कृताय। ओषधीनाम्। मंत्रिणे।
वाणिजाय। कक्षाणाम्। उच्चैर्घोषायेत्युच्चैः। घोषाय। आक्रंदयत इत्या क्रंदयते। पत्तीनाम्॥ १९॥ कृत्स्ना
यतायेति कृत्स्न। आयतया। धावते। सत्वनाम्। सहमानाय। निव्याधिन इति नि। व्याधिने। आव्याधिनीनामि

५८

नी२

या। व्याधिनीनाम्। निषंगिणे। ककुभाय। स्तेनानाम्। निचेरव इति निचेरवे। परिचरायेति परि। चराय। अत्र
रेस्याणाम्॥२०॥ वंचते। परिवंचत इति परि। वंचते। स्तायूनाम्। निषंगिणे। इषुधिमत इषुधि। मते। त
103 स्कराणाम्। सृकायिभ्य इति सृकायि। भ्यः। जिघांसद्भ्य इति जिघांसत्। भ्यः। मुष्णताम्। असिमद्भ्य
इत्यसिमत्। भ्यः। नक्तम्। चरद्भ्य इति चरत्। भ्यः। विकृन्तानामिति वि। कृन्तानाम्॥२१॥ उष्णीषिणे। गिरिचरा
येति गिरि। चराय। कुलुञ्चानाम्। इषुमद्भ्य इतीषुमत्। भ्यः। धन्वायिभ्य इति धन्वायि। भ्यः। आ। तन्वाने २०३
भ्य इत्या। तन्वानेभ्यः। प्रतिदधानेभ्य इति प्रति। दधानेभ्यः। आयच्छद्भ्य इत्या। यच्छत्। भ्यः। अस्यद्भ्य इत्य

स्यतोभ्यः॥२२॥विसृजद्भ्यइतिविसृजत्।विध्यद्भ्यइतिविध्यत्।भ्यः।स्वपद्भ्यइतिस्वपत्।भ्यः।जाग्रद्भ्यइतिजा
ग्रत्।भ्यः।शयानेभ्यः।आसीनेभ्यः।तिष्ठद्भ्यइतितिष्ठत्।भ्यः।धावद्भ्यइतिधावत्।भ्यः॥२३॥सभाभ्यः।सभाप
तिभ्यइतिसभापति।भ्यः।अश्वेभ्यः।अश्वपतिभ्यइत्यश्वपति।भ्यः।आव्याधिनीभ्यइत्या।व्याधिनीभ्यः।विविध्यन्ती
भ्यइतिवि।विध्यन्तीभ्यः।उगणाभ्यः।तृंहतीभ्यः॥२४॥गणेभ्यः।गणपतिभ्यइतिगणपति।भ्यः।व्रातेभ्यः।व्रा
तपतिभ्यइतिव्रातपति।भ्यः।गृत्सेभ्यः।गृत्सपतिभ्यइतिगृत्सपति।भ्यः।विरूपेभ्यइतिवि।रूपेभ्यः।विश्वरू
पेभ्यइतिविश्व।रूपेभ्यः॥२५॥सेनाभ्यः।सेनानिभ्यइतिसेनानि।भ्यः।रथिभ्यइतिरथि।भ्यः।अरथेभ्यः।क्षतृ

भ्यइतिव्रातऽभ्यः।संग्रहीतृभ्यइतिसंऽग्रहीतृऽभ्यः।मदद्भ्यइतिमदऽतृऽभ्यः।नमःऽनमः॥२६॥ तक्षभ्यइतित
क्षऽभ्यः।रथकारेभ्यइतिरथऽकारेभ्यः।कुलालेभ्यः।कर्मारेभ्यः।निषादेभ्यः।निसादेभ्यइतिनिसादेभ्यः।
पुंजिष्ठेभ्यः।श्वनिभ्यइतिश्वऽनिऽभ्यः।मृगयुभ्यइतिमृगयुऽभ्यः॥२७॥ श्वभ्यइतिश्वऽभ्यः।श्वपतिभ्यइतिश्वपति।
भ्यः।भवाय।रुद्राय।शर्वाय।पशुपतयइतिपशुऽपतये।नीलग्रीवायेतिनीलऽग्रीवाय।शितिकंठायेतिशिति।
कंठाय॥२८॥ कपर्दिने।व्युप्तकेशायेतिव्युप्तऽकेशाय।सहस्राक्षायेतिसहस्रऽअक्षाय।शतधन्वनइतिशतऽध १०४
न्वने।गिरिशयायेतिगिरिऽशयाय।शिपिविष्टायेतिशिपिऽविष्टाय।मीढुष्टमाय।मीढुस्तमायेतिमीढुंऽतमा

या। इषुमत् इतीषु।मते॥२९॥ ह्रस्वाय। वामनाय। बृहते। वर्षीयसे। वृद्धाय। संवृध्व इति सं।वृध्वे। अग्र्या-
य। प्रथमाय॥३०॥ आशवे। अजिराय। शीघ्र्याय। शीभ्याय। ऊर्म्याय। अवस्वन्यायेत्यवस्वन्याय। नादेया-
य। द्वीप्याय॥३१॥ ज्येष्ठाय। कनिष्ठाय। पूर्वजायेति पूर्व।जाय। अपरजायेत्यपर।जाय। मध्यमाय। अपगल्भा-
य। जघन्याय। बुध्न्याय॥३२॥ सोभ्याय। प्रतिसर्यायेति प्रति।सर्याय। याम्याय। क्षेम्याय। श्लो-
क्याय। अवसान्यायेत्यवसान्याय। उर्वर्याय। खल्याय॥३३॥ वन्याय। कक्ष्याय। श्रवाय। प्रतिश्रवायेति प्र-
ति। श्रवाय। आशुषेणाय। आशुसेनायेत्याशु।सेनाय। आशुरथायेत्याशु।रथाय। शूराय। अवभिन्दत इ

यवा। नेदिने॥३४॥ बिल्मिने। कवचिने। वर्मिणे। वरूथिने। श्रुताय। श्रुतसेनायेति श्रुत। सेनाय। दुंदुभ्या
105 य। चाहनंन्यायेत्या। हनन्याय॥३५॥ धृष्णवे। प्रमृशायेति प्र। मृशाय। निषंगिणे। इषुधिमत इतीषुधि। म
ते। तीक्ष्णेषव इति तीक्ष्ण। इषवे। चायुधिने। स्वायुधायेति सु। आयुधाय। सुधन्वन इति सु। धन्वने॥३६॥
स्रुत्याय। पथ्याय। काट्याय। नीप्याय। कुल्याय। सरस्याय। नादेयाय। वैशंताय॥३७॥ कूप्याय। चावट्याय।
वीध्र्यायेति वि। इध्र्याय। आतप्यायेत्या। तप्याय। मेघ्याय। विद्युत्यायेति वि। द्युत्याय। वर्ष्याय। चावर्ष्याय। १०५
॥३८॥ वात्याय। रेष्म्याय। वास्तव्याय। वास्तुपायेति वास्तु। पाय। सोमाय। रुद्राय। ताम्राय। चारुणाय॥३९॥

शंगवइतिशम्।गवे।पशुपतयइतिपशु।पतये।उग्राय।भीमाय।अग्रेवधायेत्यग्रे।वधाय।दूरेवधाय
तिदूरे।वधाय।हन्त्रे।हनीयसे।वृक्षेभ्यः।हरिकेशेभ्यइतिहरि।केशेभ्यः।ताराय॥४०॥शंभवायेतिशम्।भ
वाय।मयोभवायेतिमयः।भवाय।शंकरायेतिशम्।कराय।मयस्कराय।मयःकरायेतिमयः।कराय।शिवा
य।शिवतरायेतिशिव।तराय॥४१॥पार्याय।अवार्याय।प्रतरणायेतिप्र।तरणाय।उत्तरणायेत्युत्।तरणाय।
तीर्थ्याय।कूल्याय।शष्प्याय।फेन्याय॥४२॥प्रवाह्यायेतिप्र।वाह्याय।किंशिलाय।क्षयणाय।कपर्दि
ने।पुलस्तये।इरिण्याय।प्रपथ्यायेतिप्र।पथ्याय॥४३॥व्रज्याय।गोष्ठ्याय।गोस्थ्यायेतिगो।स्थ्याय।

106

तल्प्याय। गेह्याय। हृदय्याय। निवेष्प्यायेति नि। वेष्प्याय। काट्याय। गह्वरेष्ठाय। गह्वरेस्थायेति गह्वरे। स्था
य॥४४॥ शुष्क्याय। हरित्याय। पांसव्याय। रजस्याय। लोप्याय। उलप्याय। ऊर्व्याय। सूर्म्यायेति सु। ऊ
र्म्याय॥४५॥ पर्ण्याय। पर्णशदायेति पर्ण। शदाय। उद्गुरमाणायेत्युत्। गुरमाणाय। अभिघ्नत इत्यभि। घ्नते। आ
खिदत इत्या। खिदते। प्रखिदत इति प्र। खिदते। इषुकृद्भ्य इतीषुकृत्। भ्यः। धनुष्कृद्भ्यः। धनुष्कृद्भ्य इति धनुः। कृ
त्। भ्यः। किरिकेभ्यः। देवानाम्। हृदयेभ्यः। विचिन्वत्केभ्य इति वि। चिन्वत्केभ्यः। विक्षिणत्केभ्य इति वि। क्षिणत्के १०६
भ्यः। आनिर्हतेभ्य इत्यानिः। हतेभ्यः॥४६॥ द्रापे। अन्धसः। पते। दरिद्र। नीललोहितेति नील। लोहित। आ

सामा। प्रज्ञानामिति प्र। ज्ञानाम्। एषाम्। पशूनाम्। मा। नेः। मा। रोक्। मो इति मो। चा। नः। किम्। चन। आममत्॥४७॥
इमाः। रुद्राय। तवसे। कपर्दिने। क्षयद्वीरायेति क्षयत्। वीराय। प्रेति प्र। भरामहे। मतीः। यथा। शम्। असत्। द्विपद इ
ति द्वि। पदे। चतुष्पाद इति चतुः। पादे। विश्वम्। पुष्टम्। ग्रामे। अस्मिन्। अनातुरम्॥४८॥ या। ते। रुद्र।
शिवा। तनूः। शिवा। विश्वाहा। भेषजी। शिवा। रुतस्य। भेषजी। तया। नः। मृड। जीवसे॥४९॥ परि। नः। रुद्रस्य।
हेतिः। वृणक्तु। परि। त्वेषस्य। दुर्मतिरिति दुः। मतिः। अघायोः। अघयोरित्यघ। योः। अव। स्थिरा। मघवद्भ्य इति
मघवत्। भ्यः। तनुष्व। मीढ्वः। तोकाय। तनयाय। मृड॥५०॥ मीढुष्टम। मीढुस्तमेति मीढुः। तम। शिवतमामति

ति

शिवा।तमः।शिवः।नः।सुमनाइतिसुऽमनाः।नवा।परमे।वृक्षे।आयुधम्।निधायेतिनिऽधाय।कृत्तिम्।व
107 सानः।आ।चर।पिनाकम्।बिभ्रत्।आ।गहि।।५३।।विकिरिद्रेतिविऽकिरिद्र।विलोहितेतिविऽलोहित।न
मः।ते।अस्तु।भगवइतिभगऽवः।याः।ते।सहस्रम्।हेतयः।अन्यम्।अस्मत्।नि।वपन्तु।ताः।।५४।।सह
स्राणि।सहस्रशइतिसहस्रऽशः।बाह्वोः।तव।हेतयः।तासाम्।ईशानः।भगवइतिभगऽवः।पराचीना
मुखा।कृधि।।५५।।असंख्यातेत्यसम्ऽख्याता।सहस्राणि।येरुद्राः।अधि।भूम्याम्।तेषाम्।सहस्रयो २०१
जनइतिसहस्रऽयोजने।अव।धन्वानि।तन्मसि।।५६।।अस्मिन्।महति।अर्णवे।अन्तरिक्षे।भवाः।अधि

श्रिताः ॥५५॥ नीलग्रीवाइति नीलग्रीवाः । शितिकंठाइति शितिकंठाः । दिवम् । रुद्राः । उपश्रिताइत्युपश्रिताः ॥ श्रि
ताः सर्वाः । अधः । क्षमाचराइति क्षमाचराः ॥५६॥ वृक्षेषु । शष्पिंजराः । नीलग्रीवाइति नीलग्रीवाः । विलो
हिताइति विलोहिताः ॥५७॥ भूतानाम् । अधिपतयइत्यधिपतयः । विशिखासइति विशिखासः । कपर्दिनः ।
॥५८॥ पथाम् । पथिरक्षयइति पथिरक्षयः । ऐलबृदाः । आयुर्युधइत्यायुः । युधः । तीर्थानि । प्रचरंतीति प्र ।
चरंति । सृकाहस्ताइति सृका । हस्ताः । निषंगिणः ॥५९॥ अन्नेषु । विविध्यंतीति वि । विध्यंति । पात्रेषु । पिबतः ।
जनान् ॥६०॥ एतावंतः । च । भूयांसः । दिशः । रुद्राः । वितस्थिरइति वि । तस्थिरे ॥६१॥ नमः । अस्तु । रुद्रेभ्यः ।

वा

ये। दिवि। येषाम्। वर्षम्। इषवः। तेभ्यः। दश। प्राचीः। दक्षिणा। प्रतीचीः। उदीचीः। ऊर्ध्वाः। अंतरिक्षे। वातः। पृ
थिव्याम्। अन्नम्॥ ६३॥ ॥ इति संहितापदपाठे षोडशोऽध्यायः॥ ॥ अश्मन्। ऊर्जम्। पर्वते। शिश्रियाणा
म्। अद्भ्यः। ओषधीभ्यः। वनस्पतिभ्यः। इति वनस्पतिऽभ्यः। अधि। संभृतम्। इति सम्ऽभृतम्। पयः। ताम्।
नः। इषम्। ऊर्जम्। धत्त। मरुतः। संऽरराणाः। इति सम्ऽरराणाः। अश्मन्। ते। क्षुत्। मयि। ते। ऊर्क्॥ १॥ इमाः।
मे। अग्ने। इष्टकाः। धेनवः। संतु। एका। च। दश। च। शतम्। सहस्रम्। अयुतम्। नियुतम्। इति निऽयुतम्। प्रयुतम्। इ १०८
ति प्रऽयुतम्। अर्बुदम्। न्यर्बुदम्। इति निऽअर्बुदम्। समुद्रः। मध्यम्। अंतः। परार्द्धः। इति पराऽअर्द्धः। एताः। अ

सुत्रे। अमुष्मिन्। लोके॥ २॥ ऋतवः। स्थ। ऋता। वृधः। ऋतवृध इत्यृत। वृधः। श्रुष्टाः। ऋतस्था इत्यृत। स्थाः।
स्थ। ऋता। वृधः। ऋतवृध इत्यृत। वृधः। घृत। श्चुतः इति घृत। श्चुतः। मधुश्चुत इति मधु। श्चुतः। विराज इति वि। राजः। नाम।
कामदुघा इति काम। दुघाः। अक्षीयमाणाः॥ ३॥ समुद्रस्य। वा। अवकया। अग्ने। परि। व्ययामसि। पावकः। अस्मभ्यं
मू। शिवः। भव। हिमस्य। वा। जरायुणा॥ ४॥ उप। ज्मन्। उप। वेतसे। अवतरं। नदीषु। आ। अग्ने। पित्तम्। अपाम्। अ
सि। मण्डूकि। ताभिः। आ। गहि। सा। इमम्। नः। यज्ञम्। पावकवर्णमिति पावक। वर्णम्। शिवम्। कृधि॥ ५॥ अपाम्।
इदम्। न्ययनमिति नि। अयनम्। समुद्रस्य। निवेशनमिति नि। वेशनम्। अन्यान्। ते। अस्मत्। तपन्तु। हेतयः।

109 ॥९॥ अग्ने । पावक । रोचिषा । मन्द्रया । देव । जिह्वया । आ । देवान् । वक्षि । यक्षि । च ॥ ७ ॥ सः । नः । पावक । दीदि
वइति दीदिऽवः । अग्ने । देवान् । इह । आ । वह । उप । यज्ञम् । हविः । च । नः ॥ ८ ॥ पावकया । यः । चितयन्त्या । कृपा । क्षा
मन् । रुरुचे । उषसः । न । भानुना । तूर्वन् । न । यामन् । एतशस्य । नु । रणे । आ । यः । घृणे । न । ततृषाणः । अजरः ॥ ९ ॥
नमः । ते । हरसे । शोचिषे । नमः । ते । अस्तु । अर्चिषे ॥ १० ॥ नृषदे । नृसदइति नृऽसदे । वेट् । अप्सुषदे । अप्सुस
दइत्यप्सुऽसदे । वर्हिषदे । वर्हिःसदइति वर्हिःऽसदे । वनसदइति वनऽसदे । स्वर्विदइति स्वःऽविदे ॥ ११ ॥ या २०९
देवाः । देवेषु । अधि । दत्तम् । इति देवऽत्रम् । आयन् । अथ । ब्रह्मणः । पुरस्तात् इति पुरः । एतारः । अस्याथेमः ।
देवानां यज्ञियो [illegible] यज्ञियानां संवत्सराणि उप [illegible] मासं तो [illegible] इत्यादि [illegible]
हविषा [illegible] ॥ [illegible] ॥ १

नासूत। प्रवतः। धम॥ किं। वनानाति। दिवः। नाऽपृथिव्याः। अधि। स्थु। स्नु॥१३॥ प्राणदाऽइतिप्राणऽदाः। अपान
दाऽइत्यपानऽदाः। व्यानदाऽइतिव्यानऽदाः। वर्चोदाऽइतिवर्चःऽदाः। वरिवोदाऽइतिवरिवःऽदाः॥१४॥ अग्निः। तिग्मेन।
शोचिषा। यासत्। विश्वम्। नि। अत्रिणम्। अग्निः। नः। वनते। रयिम्॥१५॥ यः। इमा। विश्वा। भुवनानि। जुह्वत्। ऋषिः।
होता। नि। असीदत्। पिता। नः। सः। आशिषेत्या। आशिषा। द्रविणम्। इच्छमानः। प्रथमछदितिप्रथमऽछत्। अवरान्। आ। वि
वेश॥१६॥ किम्। स्वित्। आसीत्। अधिष्ठानम्। अधिस्थानमित्यधिऽस्थानम्। आरंभणमित्याऽरंभणम्। कतमत्। स्वित्।
कथा। आसीत्। यतः। भूमिम्। जनयन्। विश्वकर्मेति विश्वऽकर्मा। वि। द्याम्। और्णोत्। महिना। विश्वचक्षाऽइ

स्थानी

तिविश्वचक्षाः॥२७॥ विश्वतश्चक्षुरितिविश्वतः।चक्षुः।उत।विश्वतोमुखइतिविश्वतःऽमुखः।विश्वतोबाहुरि
तिविश्वतः।बाहुः।उत।विश्वतस्पात्।विश्वतःपादितिविश्वतःऽपात्।सम्।बाहुभ्यामितिबाहुऽभ्याम्।धमति।सम्।
पतत्रैः।द्यावाभूमीइतिद्यावाऽभूमी।भूमी।जनयन्।देवः।एकः॥२८॥ किम्।स्वित्।वनम्।कः।उँइत्यूँ।सः।वृ
क्षः।आस।यतः।द्यावापृथिवीइतिद्यावाऽपृथिवी।निष्टतक्षुः।निस्ततक्षुरितिनिः।ततक्षुः।मनीषिणः।मनसा।पृच्छत
इत।उँइत्यूँ।तत्।यत्।अध्यतिष्ठदित्यधिऽअतिष्ठत्।भुवनानि।धारयन्॥२९॥ या।ते।धामानि।परमाणि।या।अवमा। ११०
या।मध्यमा।विश्वकर्मन्नितिविश्वऽकर्मन्।उत।इमा।शिक्ष।सखिऽभ्यः।इतिसखिऽभ्यः।हविषि।स्वधावन्नितिस्वधाऽवः।

स्वयम्। यजस्व। तन्वम्। वृधानः॥२०॥ विश्वकर्म्मन्निति विश्व। कर्मन्। हविषा। वा। वृधानः। ववृधानइति ववृधानः।
स्वयंयजस्व। पृथिवीम्। उत। द्याम्। मुह्यंतु। अन्ये। अभितः। सपत्नाइति स। पत्नाः। इह। अस्माकम्। मघवेति मघ।
वा। सूरिः। अस्तु॥२१॥ चक्षुषः। पिता। मनसा। हि। धीरः। घृतम्। एनेइत्येना। अजनत्। नम्नमानेइति नम्नमाना। यदा।
इत्। अन्ताः। अददृहन्त। पूर्वे। आत्। इत्। द्यावापृथिवीइति द्यावा। पृथिवी। अप्रथेताम्॥२२॥ विश्वकर्मेति वि
श्व। कर्मा। विमनाइति वि। मनाः। आत्। विहाइति वि। हायाः। धाता॥ विधातेति वि। धाता। परमा। उत। संदृगिति स
सम्। दृक्। तेषाम्। इष्टानि। सम्। इषा। मदन्ति। यत्र। सप्तऋषीनिति सप्त। ऋषीन्। परः। एकम्। आहुः॥२३॥ यः। नः। पि

नार

या

ता।जनिता।यः।विधतेतिविधता।धामानि।वेद।भुवनानि।विश्वा।यः।देवानाम्।नामधाइतिनामधाः।एकः।
एव।तम्।संप्रश्नमितिसम्।प्रश्नम्।भुवना।यंति।अन्या॥२४॥ते।आ।अयजंत।द्रविणम्।सम्।अस्मै।ऋष
यः।पूर्वे।जरितारः।न।भूना।असूर्ते।सूर्ते।रजसि।निषत्ते।निसत्तइतिनि।सत्ते।ये।भूतानि।समकृण्वन्नि
तिसम्।अकृण्वन्।इमानि॥२५॥परः।दिवा।परः।पृथिव्या।परः।देवेभिः।असुरैः।यत्।अस्ति।कम्।स्वित्।ग
र्भम्।प्रथमम्।दध्रे।आपः।यत्र।देवाः।समपश्यंतेतिसम्।अपश्यंत।विश्वे॥२६॥तम्।इत्।तम्।इत्।समगं १११
छंतेतिसम्।अगछंत।विश्वे।अजस्य।नाभौ।अधि।एकम्।अर्पितम्।यस्मिन्।विश्वानि।भुवनानि।तस्थुः॥२७॥

नातम्। विदाथ। यः। इमा। जजान। अन्यत्। युष्माकम्। अंतरम्। बभूव। नीहारेण। प्रावृताः। जल्प्याः। च। असु
तृपः। उक्थसुप। आपः। उक्थशासः। उक्थशासः। चरंति॥२०॥ विश्वकर्मेति विश्व। कर्मा। हि। अजनि
ष्ट। देवः। आत्। इत्। गंधर्वः। अभवत्। द्वितीयः। तृतीयः। पिता। जनिता। ओषधीनाम्। अपाम्। गर्भम्। वि। अदधात्। पुरु
त्रा। पुरुत्रेति पुरु। त्रा॥२१॥ आशुः। शिशानः। वृषभः। न। भीमः। घनाघनः। क्षोभणः। चर्षणीनाम्। संक्रंद
न इति सम्। क्रंदनः। अनिमिष इत्यनि। मिषः। एकवीर इत्येक। वीरः। शतम्। सेनाः। अजयत्। साकम्। इंद्रः॥२२॥ सं
क्रंदनेति सम्। क्रंदनेन। अनिमिषेणेत्यनि। मिषेण। जिष्णुना। युत्कारेणेति युत्। कारेण। दुश्च्यवनेति दुः।

च्यवनेन। धृष्णुना। तत्। इंद्रेण। जयत। तत्। सहध्वम्। युधः। नरः। इषुऽहस्तेन। वृष्णा॥२॥ सः। इषुऽह
स्तैरितीषुऽहस्तैः। सः। निषंगिभिरिति निषंगिऽभिः। वशी। संऽस्रष्टेति सम्ऽस्रष्टा। सः। युधः। इंद्रः। गणेन।
संसृष्टजिदिति संसृष्टऽजित्। सोमपा इति सोमऽपाः। बाहुशर्द्धीति बाहुऽशर्द्धी। उग्रधन्वेत्युग्रऽधन्वा। प्र
तिहिताभिरिति प्रतिऽहिताभिः। अस्ता॥३॥ बृहस्पते। परि। दीय। रथेन। रक्षोहेति रक्षःऽहा। अमित्रान्।
अपबाधमान इत्यपऽबाधमानः। प्रभंजन्निति प्रऽभंजन्। सेनाः। प्रमृण इति प्रऽमृणः। युधा। जयन्। अस्माक ११२
म्। एधि। अविता। रथानाम्॥४॥ बलविज्ञाय इति बलऽविज्ञायः। स्थविरः। प्रवीर इति प्रऽवीरः। सहस्वान्। वा

जी।सहमानः।उग्रः।अभिवीरइत्यभि।वीरः।अभिसत्वेत्यभि।सत्वा।सहोजाइतिसहः।जाः।जैत्रम्।इंद्र।रथम्।
आ।तिष्ठ।गोविदितिगो।वित्।।३४।।गोत्रभिदमितिगोत्र।भिदम्।गोविदमितिगो।विदम्।वज्रबाहुमितिवज्र।
बाहुम्।जयंतम्।अज्म।प्रमृणंतमितिप्र।मृणंतम्।ओजसा।इमम्।सजाताइतिस।जाताः।अनु।वीरयध्वम्।
इंद्रम्।सखायः।अनु।सम्।रभध्वम्।।३५।।अभि।गोत्राणि।सहसा।गाहमानः।अदयः।वीरः।शतमन्यु
रितिशत।मन्युः।इंद्रः।दुश्च्यवनइतिदुः।च्यवनः।पृतनाषाट्।अयुध्यः।अस्माकम्।सेनाः।अवतु।प्र।युत्स्विति
युत्सु।।३६।।इंद्रः।आसाम्।नेता।बृहस्पतिः।दक्षिणा।यज्ञः।पुरः।एतु।सोमः।देवसेनानामितिदेव।सेनानाम्।
ना

जयंतीम् (ना)

113

मू। अभिभंजतीनामित्यभिभंजतीनाम्। मरुतः। यंतु। अग्रम्॥३७॥ इंद्रस्य। वृष्णः। वरुणस्य। राज्ञः। आदित्या
नाम्। मरुताम्। शर्द्धः। उग्रम्। महामनसामिति महा। मनसाम्। भुवनच्यवानामिति भुवन। च्यवानाम्। घोषः। देवा
नाम्। जयताम्। उत्। अस्थात्॥३८॥ उत्। हर्षय। मघवन्निति मघ। वन्। आयुधानि। उत्। सत्वनाम्। मामकानाम्।
मनांसि। उत्। वृत्रहन्निति वृत्र। हन्। वाजिनाम्। वाजिनानि। उत्। रथानाम्। जयताम्। यंतु। घोषाः॥३९॥
अस्माकम्। इंद्रः। समृतेष्विति सम्। ऋतेषु। ध्वजेषु। अस्माकम्। याः। इषवः। ताः। जयंतु। अस्माकम्। वीराः। उत्तर २२३
इत्युत्। तराः। भवंतु। अस्मान्। ऊँ इत्यूँ। देवाः। अवत। हवेषु॥४०॥ अमीषाम्। चित्तम्। प्रतिलोभयंतीति प्रति

त्वा । नयंती । गृह्णा । अंगानि । अप्वे । परा । इहि । अभि । प्र । इहि । निः । दह । हृत्स्विति हृत्सु । शोकैः । ग्राह्येन । अ

